१३
१२

93
12

"अथ"

ग्रन्थनामः-	"प्रश्नोपनिषद्भाष्यविवरणम्"	Prashnoupanisha Bhashyavivaranam
कर्तृनामः-	'नारायणेन्द्रसरस्वती'	Narayanendra Saraswati.
विषयः-	अद्वैतवेदान्तम्'	Advytam.

892

१३/१२

अथ

"प्रश्नोपनिषद्भाष्यविवरणम्" १२/१२

१३/१२

१९०

॥प्रश्नभाष्यनारायणींद्री॥

नं ३८

नारायणेन्द्रसरस्वतीरचितम्"

श्रीगणाधिपतये नमः॥ आथर्वणे ब्रह्मा देवानामित्यादिमंत्रैरेवात्मतत्त्वस्य निर्णीतत्वात् तत्रैव ब्राह्मणेन
तदभिधाने पुनरुक्तमित्याशंक्य तस्यैव विस्तरेण प्राणोपासनादिसाधनसाहित्येनाभिधानान्न पौन
रुक्त्यमिति वदन्ब्राह्मणमवतारयति। मंत्रेति विस्तरेति मंत्रे द्वे विद्ये वेदितव्ये परा चैवापरा चेति। उक्तत्वा
परा ऋग्वेदाद्यभिधेयेत्युक्तं। सा च विद्या कर्मरूपा उपासनारूपा चेति द्वितीयतृतीयप्रश्नाभ्यां विविच्य
यते। आद्या कर्मकाण्डे विवृत्तेति नेह विविच्यते। उभयोः फलं तु ततो वैराग्यार्थं प्रथमप्रश्ने स्पष्टीक्रियते। प
रविद्या च अथ परा यया तदक्षरमधिगम्यत इत्युप क्रम्य कृत्स्नेन मुंडकेन प्रतिपादिता। तत्रापि यथा सुदी
प्तादित्यादिमंत्रद्वयोक्तार्थस्य विस्तारार्थं चतुर्थः प्रश्नः। प्रणवो धनुरित्यत्रोक्तप्रणवोपासनविवरणार्थं
पंचमः प्रश्नः। एतस्माज्जायते प्राण इत्यादिना शेषेण मुंडकेनोक्तस्यार्थस्य स्पष्टीकरणार्थः षष्ठः
प्रश्न इति। इदं ब्राह्मणं तद्विस्तरानुवादीत्यर्थः। अत एव विषयप्रयोजनादिकं तत्रैवोक्तमिति नेह
पुनरुच्यत इति बोध्यं। आख्यायिका यां ब्रह्मचर्यतपआदिसाधनविधानं पुराकल्पस्वरूपे
णाप्ययोजनान्तरं चास्तीत्याह। ब्रह्मचर्यादिसाधनेति। सौर्यायणीति वक्तव्ये दैर्घ्यं छांदसमि
त्यर्थः। युवप्रत्यय इति कत्यस्य युवापत्ये विवक्षिते फक् प्रत्यये तस्यायनादेशे च कात्यायन इति लि
ङ्गीत्यर्थः। ब्रह्मपराणां पुनर्ब्रह्मान्वेषणमयुक्तमित्यत आह। अपरं ब्रह्मेति। ननु परब्रह्मा
न्वेषणेन नैव पुरुषार्थसिद्धेः किं परब्रह्मान्वेषणेनेत्याशंक्येतो। किं तदिति। तस्य कोतिशायेद्

त्यर्थः ॥ तस्या अनित्यत्वेन तत्प्राप्तेरप्यनित्यहेतुत्वेनापुरुषार्थत्वात्परस्यैव नित्यत्वात्तत्प्राप्तेस्तज्ज्ञा
४ नमात्रसाध्यत्वेनाधिनित्यत्वाच्च तस्यैवान्वेषणीयत्वमिति परस्वरूपकथनेनाह ॥ य इति ॥ परं ब्रह्मा
न्वेषमाणा नैकोतिप्राप्य इत्यत आह ॥ तत्प्राप्त्यर्थमिति ॥ तत्प्राप्त्यर्थं तदधिगमायैतदन्वेषणं कुर्वतो
यथाकाममंपत्स्याम इत्येवमभिप्रायेणेत्यन्वयः ॥ समिदिति ॥ समित्कुशहस्ता यथायोग्यं दंतकाष्ठा
द्युपहारोपलक्षणार्थं ॥ तथापीत्यस्य तपसेत्यतः पूर्वमन्वयः विशेषणाद्वयस्य पूर्वत्राप्यन्वयः ॥ नि
कृष्टमर्थमाह ॥ यद्वि वय इति ॥ प्रश्नानां यथार्थत्वाभावहेतुमाह ॥ प्रश्नेति ॥ अत्रेति शब्दोऽध्याहार्यः ॥
सर्व प्रश्नानां निर्णयाद् ज्ञानाद्यसंभवादित्यर्थः ॥ परं ब्रह्मान्वेषमाणा इत्युपक्रांते अस्मिन्ब्र
ह्मप्रकरणे प्रजापतिकर्तृक प्रजासृष्टिविषयप्रश्नप्रयुक्तेरसंगतिमाशंक्य प्रश्नप्रवृत्ति
रूपायाश्रुतेस्तात्पर्यमाह ॥ अपरं च ह्येति ॥ तेषामसौ विरजो ब्रह्मलोक इति समुच्चितकार्यस्य ब्रह्मलो
कस्य अथोत्तरेणेति तद्गतेर्देवयानमार्गस्य चेह वक्ष्यमाणत्वादित्यर्थः ॥ इदमुपलक्षणं केवलकर्मणां
चेत्यपि द्रष्टव्यं केवलकर्मकार्यस्यास्यापि चंद्रलोकस्य तद्गतेः पि तृयाणस्य च तेषामेवैष ब्रह्मलो
कः प्रजाकामा दक्षिणं प्रतिपद्यंत इति वक्ष्यमाणत्वादिति यद्यपि इदमपि परब्रह्मजिज्ञासाव
सरे असंगतमेव तथापि केवलकर्मकार्यात्समुच्चितकर्मकार्यात्त्र विरक्तस्यैव तत्राधिकार इति
ततो वैराग्यार्थमिदमुच्यते यद्यपि सुखतः सृष्टिः प्रतीयते तथापि तदुक्तौ प्रयोजनाभावात्सृष्टिद्वारकव्याजे

प्र॰भा॰ना॰ नापरविद्याफलमेवात्रोच्यत इति भावः॥ प्रश्नप्रतिवचनं चेत्यपि द्रष्टव्यं ताभ्यामेव तदुक्तेरिति
तस्मै स होवाचेति प्रतिज्ञातं विशेषतो दर्शयति॥ तदपाकरणायेति॥ आद्यस्य सनित्यस्य प्रजाकामः
सन्नित्येन्वयः॥ यथोक्तकारीति॥ ज्ञानकर्मसमुच्चयकारीत्यर्थः॥ तद्भावभावित इति॥ प्रजापतेर
जाप हं सर्वात्मेत्युपासनाकालीनप्रतिभावनायुक्त इत्यर्थः॥ पूर्वकल्पीयतद्भावभावित एतत्कल्पादौ
हिरण्यगर्भात्मना निर्वृत्तः प्रजापतिः स प्रष्ट्रात्मप्रजाकामः सन् तपः जन्मांतरभावितं ज्ञानं श्रु
तिप्रकाशितार्थविषयं अतप्यत अन्वालोचयदित्यादिना तत्संस्कारमुद्बोध्य ज्ञानमुत्पादितवानि
त्यन्वयः॥ तत्र प्रथममादित्यचंद्रोत्पादनेन तद्भावमापद्य पश्चाद्वृद्धादित्यसाध्यसंवत्सरभा
वमापद्य एवमेव तदवयवायनद्वयमासपक्षाहोरात्रभावमापद्य तन्नक्तत्साध्यव्रीह्याद्यन्नभा
वं रेतोभावं चापद्य तेन रेतसा प्रजाः सृजेयमित्येवं बुद्धिमाश्रित्य प्रथमं रयिप्राणमाविति चंद्रसूर्य
द्वंद्वमुत्पादितवानित्यर्थः॥ तत्र प्रथममादित्यचंद्रोत्पादनेन तद्भावमापद्य पश्चाद्वृद्धादित्य ह॥ स
एकमिति॥ रयिशब्देन धनवाचिना भोग्यजातं लक्षयित्वा भोग्यः सोमकिरणमन्नमुक्तं तद्द्वारा स्य श्री॰
सोमोपलक्ष्यत इत्याह॥ रयिं चेति॥ एवं प्राणशब्देनापि अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः॥ प्रा २
णापानसमायुक्तः पचाम्यन्नमिति स्मृतेरग्नेः प्राणसंबद्धाग्नेः भोक्तृत्वमत्र इत्याह॥ प्राणं चेति॥
अग्निषोमयोरेतावन्मात्रत्वेन अंडोत्पत्त्यनंतरमुत्पत्तिरित्याशयेनाह॥ अंडोत्पत्तेरिति॥ ऊर्ध्वं तं

न्नत्वंप्राधान्यविवक्षया

२

घा वादित्यमग्निं तु समारोहतीति श्रुतेः· सूर्याग्न्योरेकत्वमभिप्रेत्य अग्निः सूर्यपदेनाह· सूर्याचंद्रमसा
विति· रयिप्राणौ श्रुतिः स्वयमेव व्याचष्टे इत्याह· तथादित्य इति· प्रजापतेरेव संवत्सरादि प्रजापर्यंत
स्य सृष्टिं वक्तुं रयिप्राणयोः संवत्सरस्रष्टुः प्रजापत्युपादानकत्वात्प्रजापत्यात्मत्वमाह· तदेतदेकमि
ति· कथमेकस्यात्तान्नत्वं चेति भेद इत्याशंक्य तस्यैव गुणभावविवक्षयोऽत्तान्नत्वमिति भेद इत्याह· गुणेति·
रयिप्राणयोः कथं प्रजापत्यात्मत्वमिति शंकते· कथमिति· तत्र रयेः सर्वात्मकत्वात्प्रजापतित्वमित्याह· रयि
रिति· अमूर्तस्यापि वाय्वादेः केनचिद् द्यमानत्वाद्रयित्वमित्यर्थः· ननु मूर्तामूर्तयोरत्तान्नत्वयोरुभयोरपि र
यित्वे अन्नमेव रयिरिति कथमुक्तमित्याशंक्य मूर्तामूर्तविभागमकृत्वा सर्वस्य गुणप्रधानभावाविवक्षायां सर्वं रयि मात्र
रित्युच्यते· यदा तु उभे विभज्य गुणप्रधानभावेन विवक्ष्यते तदा अमूर्तेन प्राणेन मूर्तस्याद्यमानत्वान्मूर्तस्यै
व रयित्वमित्याह· तस्मादिति· रयिशब्दितस्यान्नस्य प्रजापतित्वार्थं सर्वात्मत्वमुक्त्वा प्राणस्यापि तदर्थमेव
सर्वात्मत्वमुच्यते· अथादित्य इति वाक्येनेत्याह· तथेत्यादिना· यच्चाद्यं तदपि प्राणेनात्तं प्राणोऽपि सर्वमेवेति
सर्वात्मक इत्यर्थः· स्वप्रकाशेनेति स्वकीयप्रकाशेन स्वभयेत्यर्थः· अन्नभूतानीति यद्यपि प्राणस्यात्तृत्वमुक्तं प्र
तथापि रयिर्वा एतत्सर्वमित्यत्रामूर्तस्य प्राणस्यापि गुणभावविवक्षयान्नत्वमुक्तमिति तत्तथोक्तं स्वात्मावभा
सनि स्वात्मप्रभारूपेषु रश्मिषु धित्यर्थः· व्याप्तत्वादिति संबंधत्वादित्यर्थः· तस्य प्रत्यक्त्वमाह· स एष इति· वैश्वा
नर इति· नरा जीवाः विश्वे च ते नराश्च विश्वानराः स एव वैश्वानरः सर्वजीवात्मक इत्यर्थः· विश्वरूपः सर्वप्र
पंचात्मक इति भेदः· उक्तं वस्त्विति· आदित्यस्य उक्तमाहात्म्यमित्यर्थः· विश्वरूपमित्यादि द्वितीयं तानां सहस्र

रयिमित्यादिग्रंथमंतानां सामानाधिकरण्येनान्वयायोगादध्याहारं कृत्वा वाक्यभेदेन व्याचष्टे॰ स्वात्मानमि
त्यादिना स मिथुनमुत्पादयत इत्युपक्रांतं मिथुनमुपसंहरति॰ यश्चासावित्ति॰ यश्चासौ चंद्रमाः यश्चामूर्तः प्राणस्तदेकं
मिथुनं सर्वं सर्वात्मकमित्यन्वयः॰ एतौ मे बहुधा प्रजाः करिष्यत इत्युक्तं तत्केन प्रकारेणेति पृच्छति॰ कथमिति॰ रयिः
प्राणयोः संवत्सरादिद्वारा प्रजास्रष्टृत्वमित्याह॰ उच्यत इति॰ तदेव मिथुनमेव संवत्सरः कालः स च प्रजापतिः प्रजा
पत्यात्मकमिथुननिर्वर्त्यत्वादित्याह॰ तन्निर्वर्त्यत्वादिति॰ तदुपपादयति॰ चंद्र इति॰ चंद्रनिर्वर्त्योस्ति ध्रुवः आदित्य
निर्वर्त्यान्यहोरात्राणीति विभागस्तन्निर्वर्त्यत्वेपि कालस्य कथं तदात्मकत्वमित्याशंक्य कार्यकारणयोरभेदादित्याह॰
तदनन्येति॰ न केवलं तिथ्यादिद्वारा चंद्रादिनिर्वर्त्यत्वं संवत्सरस्य किंतु अयनद्वयद्वारापीति वक्तुं तस्यायने
इत्यादि वाक्यं तत्प्रश्नपूर्वकं व्याचष्टे॰ तत्कथमिति॰ चंद्रादित्यनिर्वर्त्यत्वं कुतो हेतोस्तस्मादित्यर्थः॰ केवलकर्मिणां
लोकान्विदधद्दक्षिणेन याति ज्ञानयुक्तकर्मवतां लोकान्विदधदुत्तरेण यातीत्यन्वयः॰ सवितर्युपलक्षणं चंद्रस्या
पि॰ ज्येष्ठादि दक्षिणायनं मार्गशीर्षादिरुत्तरायणमिति श्रुतिषु प्रसिद्धेः॰ ततश्च कर्मिणां लोकान्विधातुं तयोर्दक्षिण
मार्गशीर्ष्यां त्तरायणयोर्गमनात्तन्निमित्तत्वाच्चायनद्वयप्रसिद्धेस्तन्निर्वर्त्यत्वं तयोरयनयोरिति तद्द्वारा संवत्सरस्यापि तन्निवर्त्यत्वमि
त्यर्थः॰ चंद्रादित्ययोः कथं लोकविधायकत्वमिति पृच्छति॰ कथमिति॰ चंद्रादित्यनिर्वर्त्यदक्षिणोत्तरायणद्वारा लोकप्राप्तेः श्री॰
प्राप्यस्य लोकस्यापि चंद्रादित्यात्मकत्वाच्च तयोस्तद्विधायकत्वमिति तद्येह वा इत्यादिवाक्येन परिहरति॰ तत्रचेति॰ ३
इष्टं चेति॰ अग्निहोत्रं तपः सत्यं वेदानां चानुपालनं॰ आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते॰ वापीकूपतडागादि दे
वतायतनानि च॰ अन्नप्रदानमारामः पूर्तमित्यभिधीयत इति॰ तयोर्भेदः॰ कृतमित्युपासत इति कृतशब्दोपरितनमि

ति शब्दं दृष्ट्वा पूर्वे इति सूत्रे शब्दो पर्यायकथ्यां आदिशब्दपर्यायतया व्याचष्टे· इत्यादीति· दक्षमादिशब्दार्थः· कृत
मेवोपासते कार्यमेवानुतिष्ठन्तीत्यर्थः· इदं च विशेषणं पुनरावृत्तौ हेतुतयोक्तं कृतरूपे इष्टापूर्ते लग्नत्वाच्चंद्रस्यापि
कृतत्वेनानित्यत्वात्पुनरावृत्तिरित्याह· कृतरूपत्वादिति· पुनरावृत्तौ त्वद्वाक्यं प्रमाणयति· इमं लोकमिति· अथे
तिमार्गेतरारंभार्थो घशब्दः प्रजापत्याख्यविषयेति· तत्प्रादात्म्यविषयेत्यर्थः· आदित्यमभिजयंत इति पूर्वम
न्वयार्थमुक्तमिदानीं व्याख्यानार्थमुक्तमिति द्रष्टव्यं सामान्यमिति समष्टिरूपमित्यर्थः· विद्यावतामिति· कर्मान
धिकारिणामत एव केवलोपासनवतामित्यर्थः· कर्मिणां च ज्ञानवतामिति· समुच्चयवतामित्यर्थः· ननु केवल
कर्मिणामप्यादित्यप्राप्तो अपुनरावृत्तिर्भविष्यतीत्याशंक्य तेषामादित्यप्राप्तिरेव नास्तीति वक्तुं इत्येष इति वाक्यं
व्याचष्टे· इति यस्मादिति· तस्मात्तेषामादित्यप्राप्तिरनाशंक्येति शेषः· यद्वा तस्मायन इत्यारभ्य इत्येनिरोध इत्यंतं प्र ब
तिवाक्यं अयनयो रयिप्राणरूपत्वप्रतिपादनपरतया व्याख्येयं तथाहि संवत्सरस्य रयिप्राणमिथुननिर्वृत्तत्वे र
यिप्राणरूपत्वं वक्तव्यं तत्कथमिति पृच्छति· तत्कथमिति· तदवयवयोरयनयोस्तद्रूपत्वं वक्तुं तयोः प्रथमं सिद्धमाह· प्र
तस्येति· प्रसिद्धिमेवाह· प्राप्यामिति· एवमपि कथं तयोस्तदात्मकत्वमित्याह· कथमिति· दक्षिणायनस्य रयित्वं
वक्तुं कर्मिणां रयिरूपचंद्रनिर्वर्तकत्वमाह· तत्रेति· [illegible]लोकमिति· सोमरूपशरीरमित्यर्थः· त
स्य कर्मकृतत्वं पुरा उक्त्या साधयति· कृतरूपत्वादिति· रयिरूपचंद्रस्य दक्षिणायनद्वारा प्राप्यत्वात्तस्यायनस्य त
दंतर्गो व इति वक्तुं तस्य कर्मिभिः प्राप्यत्वमाह· यस्मादिति· एवं च तस्य रयित्वं सिद्धमित्याह· एष इति· पितृया
णपदं दक्षिण इति· तत्प्राप्य इत्यर्थः· ततश्च तद्विशेषणस्यायनस्यापि रयित्वमित्यर्थः· इदानीमुत्तरायण

स्यप्राणत्वमाह॥ अथेति॥ प्राणरूपादित्यप्रापकत्वात् उत्तरायणस्य तस्यापि प्राणत्वमिति॥ संवत्सरस्य रयिप्राणमि
थुनात्मकत्वमिति तत्कार्यत्वं युक्तमिति भावः॥ अस्योपास्यचंद्रवैत्वरूप्यमाह॥ एतद्वा इति॥ इतरत्सर्वं समानं॥
अस्मिन्नर्थ इति॥ संवत्सरस्वरूप इत्यर्थः॥ एवंकल्पनेति॥ पंचधा कल्पनेत्यर्थः॥ जनयित्वादीति॥ संवत्सरात्मका
त्वस्य सर्वजनकत्वादित्यर्थः॥ सामानाधिकरण्यबहुव्रीहितया व्याख्याय व्यधिकरणबहुव्रीहिर्वेत्याह॥ आ
करणं चेति॥ अवयविकरणमिति॥ अवयवित्वेनकरणमित्यर्थः॥ पक्षद्वयेप्येक एवार्थः॥ द्युलोकादिति॥ आ
काशरूपादंतरिक्षलोकादित्यर्थः॥ अन्यथा स्वर्लोकात्परस्य चतुर्थत्वेन तृतीयस्यामित्यनन्वयापत्तेः॥
उदकवंतमिति॥ आदित्याज्जायते वृष्टिरिति स्मृतेरित्यर्थः॥ अन्ये इत्यस्य पूर्वार्द्धगतेन आहुरित्यनेन
संबंधः॥ उ इति तु शब्दसमानार्थो निपातः॥ परे तु तमे वाविचक्षणमाहुरित्यन्वयः॥ किमित्याहुरित्यत आ
ह॥ स स चक्र इति॥ तस्मिन्विचक्षणे सप्तचक्र आद्यात्मके सर्वमिदं जगदर्पितमित्याहुरित्यर्थः॥ तद्द्वयेपि किंद्वि
शीर्षभेद इत्यत आह॥ यद्वीति॥ पूर्वमते ऋतूनां पादत्वकल्पनया मासानामवयवत्वकल्पनया आदित्यात्म
ना संवत्सरकाल एवोक्तः॥ द्वितीये तु हेमंतशिशिरयोः पृथक्कृत्य षण्णां ऋतूनामरत्वकल्पनया संवत्स
रस्य परिवर्तनगुणयोगेन चक्रत्वकल्पनया कालत्वं प्राधान्येन सर्वाश्रयत्वेन च स एवोक्तः॥ पक्षद्वये
न पि गुणभेदे कल्पनाभेदे न च भेदः न धर्मिभेद इत्यर्थः॥ कारणत्वेप्युक्तौ कं जगदाश्रयत्वे हेतुमाह॥ यस्मि
न्निति॥ संवत्सरस्यापि मासाहोरात्ररूपव्यतिरेकेण ओषध्यादिजनकत्वाभावात्तस्य मासाद्यात्मत्व
माह॥ स एष इति॥ यथोक्त इति॥ संवत्सररूपः रयिप्राणमिथुनात्मक इत्यर्थः॥ शुक्लकृष्णयोरयि दर्शपूर्ण

तेभ्यिंध्यं तद्इत्यर्थः· उक्तमर्थं श्रुत्यारूढं करोति तदिति· रयिः पूर्ववदिति· रयिरन्नं चंद्रमा इत्यर्थः· अहः प्रलयोक्तेः प्रसंगादहनि मैथुनं निषेधति प्राणमिति प्रस्कन्दन्तीति·

मासादि कर्मानुष्ठानदर्शनात्तस्मादेत ऋषय इत्यादिवाक्यमनुपपन्नमित्याशंक्य शुक्लस्य प्राणत्वमुक्त्वा
नरस्कृतिपरतया व्याचष्टे· यस्मादिति· यस्मात्प्राणमेव सर्वात्मकत्वेन पश्यति यस्माच्च प्राणव्यतिरेकेण कृ
ष्णपक्षस्तेन न दृष्टस्तस्मादित्यन्वयः· प्राणस्य शुक्लपक्षात्मकत्वात्कृष्णपक्षादि सर्वं जगतः प्राणत्वमात्मत्वं प्राणद्वारा
कृष्णपक्षस्यापि शुक्लपक्षत्वेऽसति कृष्णे कुर्वतोऽपि प्रकाशात्मके शुक्ल एव कुर्वन्तीति शुक्लपक्षे प्राणत्वज्ञानस्य
स्कन्तिरित्यर्थः· एतत्स्तुत्यर्थमेव ज्ञानरहितान्निन्दति· इतरे त्विति· ये तु सर्वात्मानं प्राणं न पश्यन्ति अदृष्ट्वा
त्तेषां शुक्लपक्षः प्राणत्वेनाज्ञायमानत्वादज्ञात्मकः सन्कृष्णत्वमापद्यते· अतः शुक्ले कुर्वतोऽपि अदर्शना
लकत्वात्स्वकाले रहिते कृष्ण एव कुर्वन्तीति· कुतो ह वा इमाः प्रजाः प्रजायन्त इति पृष्टमित्यर्थः· पूर्वोक्तस
र्वमेतदुभयोर्मिथुनयोः संतानसाक्षात्प्रवृत्तमिति भावः· एवं क्रमेणेति· रयिप्राणस्वेच्छत्यादिक्रमेण परि
णम्य व्रीह्यादौ तस्मादयथास्थितः सन् अन्नं वै प्रजापतिरन्नात्मकोजातः प्रजापतिरित्यन्वयः· कथमिति·
अन्नरूपत्वेऽपि तस्य कथं प्रजननकत्वमित्यर्थः· तेनेति· भक्षितादन्नादित्यर्थः· रेत इति· शोणितस्याप्युपल
क्षणं तत्त्यत्वादिति प्रजापतिव्रतचरणमात्रेणादृष्टफले चंद्रलोकः प्राप्यते मूर्खैरित्याह प्रसंगादत्राह द
इष्टापूर्तेति· चांद्रमसो ब्रह्मलोक इति· अपरब्रह्मणः प्रजापते रंशत्वाद्रयिरूपस्य चंद्रस्य ब्रह्मलोकत्वमित्य
इष्टादिकारिणां र्थः· तप आदिकमपि चंद्रलोकप्राप्त्यर्थमपेक्षितमित्याह· येषां तप इति· तेषां असौ विरज इत्यादिवाक्यं
व्याचष्टे· यस्त्विति· उत्तरायण इति· तेन प्राप्य इत्यर्थः· प्राणात्मभावः अपरब्रह्मतयावस्था नेमित्यर्थः·
असौ केषां तेषामितीति तेषामसौ विरज इत्यत्र तेषामित्यनेन केषां निर्देश इति प्रश्नार्थः॥ न येषु जिह्ममि

मित्यत्र जिह्मादिशब्दं व्यतिरेकप्रदर्शनेन व्याचष्टे • यथेत्यादिना • मायाया ग्रहणं तादृशानां दोषाणामुपलक्ष
णमितिवदन्यो क्वार्थसंग्रहं प्रदर्शयति • मायेत्योवर्भिति • भिक्षुरिति • परमहंसव्यतिरिक्तानां कुटीचिकाणां ग्र
हणं तेषां ब्रह्मलोकादपि विरक्तत्वेन तत्रानर्थित्वादिति शब्दार्थमाह • इत्येवहेति ॥ ॥ इति प्रश्नोपनिषद्भाष्यवि
वरणे प्रथमः प्रश्नः समाप्तः ॥ ॥ प्रश्नान्तरस्य प्रथमप्रश्नेन संगतिमाह • प्राणो वैतिः अवधारयितव्यमिति
अप्राविष्णस्य सत्यातिरित्यत्र तस्य एषोऽग्निस्तपतीत्यारभ्य अराइवरथनाभौ प्राणे सर्वं प्रतिष्ठितं प्रजापतिश्चर
सि गर्भे त्वमेव प्रतिजायसे इत्यादिना च प्रजापतित्वस्य उत्तरत्र वक्ष्यमाणत्वादित्यर्थः • इदमुपलक्षणं पूर्वं ग
तिश्च वत्सेन विरक्तस्यापि चित्तैकाग्र्यं विना वक्ष्यमाणतत्त्वज्ञानासिद्धेः तदर्थं मदानां फलविशेषार्थं च प्राणो
पासनार्थं प्रश्नद्वयारंभः • तत्रापि श्रेष्ठत्वात् तत्वप्रजापतित्वादिगुणनिर्धारणार्थं द्वितीयः प्रश्नः • तदुत्पत्त्यादि
द्वारणपूर्वकं तदुपासनविधानार्थं तृतीयप्रश्न इत्याह • एवं प्रजाशब्देन शरीरमेव गृह्यते तेन जीवस्तस्य
प्राणधारकत्वेन तद्धार्यत्वात् ... व्याचष्टे • शरीरेति • विभक्तानमिति • निर्द्धारणे षष्ठी • स्वमाहात्म्यख्यापनमिति •
अवकाशदानादिकं आकाशादीनां महत्त्वं तस्य ख्यापनं तस्य लोकान्प्रति प्रकटनं तत्र कारणं ते कुर्वन्तीत्य
र्थः • पाकं च पचतीतिवत् अवकाशदानादिकं स्वस्वकार्यं सर्वलोकप्रकटनं यथा तथा कुर्वन्तीत्यर्थः • एषदे
वहतीति वक्ष्यमाणाभिवदनादिव्यवहारसिद्ध्यर्थं चेतनत्वं संभावयितुं देवइति • विशेषणं अभिमानिव्यपदेशस्तु वि
शेषानुगतिभ्यामिति न्यायेन आकाशाद्यभिमानी देवता ग्रहणार्थं तच्च विशेषणं वाय्वादिष्वपि सर्वत्र संबध्य
ते वाग्ग्रहणं कर्मेन्द्रियोपलक्षणार्थं चक्षुरादिग्रहणं ज्ञानेन्द्रियोपलक्षणार्थमिति माह • कर्मेन्द्रियेति • कार्य

दि

श्री॰
५

रा
कृ

लक्षणाः शरीराकारेण परिणताः॰ आकाशादयः करणलक्षणानींद्रियाणि॰ महात्मभिरिति॰ आकाशादीनामव
वकाशदानादिरूपशरीरधारणेक [illegible] देहात्मकं प्रकाश्यं स्वकार्यं प्रकाशय सर्वलोकं प्रकटयेयथातथा कृत्वा अभि
वदंति अमितस्सर्वतः कृत्स्नशरीरधारणं प्रत्येकं वयमेवकुर्म इति वदंतीत्यर्थः॰ बाणमिति॰ बवयोरभेदाद्वा
तिकुत्सितं अधं वहतीति वा विना शं गच्छतीति देशाद्देशांतरं गच्छतीति वा वाणं वाणमेव बाणं कार्यकरणसंघा
तं शरीरमित्यर्थः॰ कथमेतदिति॰ एतत्तु अहमेवैतदित्याद्युक्तं एवं यथा भ्रांतं कथमित्यर्थः॰ उत्क्रांतवानिवेति॰
अत्यंतोत्क्रांत्य आवरिद्व शब्दः॰ निरपेक्ष इति॰ स्वयमेवेत्यर्थः॰ दृष्टांतेनेति॰ तद्यथेति॰ वक्ष्यमाणेनेत्य
प र्थः॰ सूर्यः सन्निति तपतीत्यनुषंगः॰ संतापयतीत्यर्थः॰ आवहः प्रवहादीति॰ आवहादयः सप्तवायुगणाः त
थाभूतः सन् मेघान् ज्योतींषि च अन्यदिन्द्रियं वहतीति शेषः॰ एषदेवः पृथिवीसन् सर्वस्य जगतो धार्यपि
ताराधिपश्चंद्रः सन्सर्वं पुष्णातीत्यर्थः॰ प्रज्ञादीति॰ प्राणमेतद्व्यंबरं वायुरित्यादिना वक्ष्यमाणं घो
दुशाकं नाम कमित्यर्थः॰ ब्रह्म चेति ब्रह्माणं जानीहीत्यर्थः॰ चशब्दार्थमाह॰ यज्ञादीति॰ अधिकृतं सर्वमे
णएवेत्यन्वयः॰ किंचेति॰ यः प्रजापतिर्विराट् सोऽपि त्वमेवेत्यन्वयः॰ पितुर्गर्भे रेतोरूपेण यस्मरति पश्चात्त्रयो
देवप्रतिरूपः सन् सदृशः सन् यः प्रजापतेस्त्वमेव प्रजायसे इत्यन्वयः॰ प्रतिशब्दोक्तं उक्तं॰ प्रतिरूपः सन्नि र्थ
ति॰ ननु प्राणस्य पुत्ररूपत्वमेवोक्तं न तु पितृमातृस्वरूपत्वं तत्कस्मादत आह॰ प्रजापतेत्वादेवेति॰ तस्य
नि सर्वात्मत्वादित्यर्थः॰ निष्कृष्टार्थमाह॰ सर्वदेहेति॰ अप्रशोधिष्ठस्यार्थमाह॰ मोक्ष्यादीनिति॰ अतस्तवैवेत्यतः
शब्दाध्याहारेणायोऽयं हविर्वाप्याययितत्वमर्हसीति॰ वह्निशब्दो वह्नन्या वृद्धिकारीति यौगिक इत्यर्थः॥ प्रथमाभवतीति॰

मातुर्गर्भेपुत्ररूपेण५ पे

प्र॰भा॰ना॰

यज्ञादिदैवेकर्मणि प्रथमेनादिमुख्यप्राणस्य अवश्यकर्तव्यत्वात्साधकतमेत्यर्थः॥ ऋषगतावितिधातोः ज्ञानार्थ
त्वान ऋषिशब्दस्य ज्ञानजनकचक्षुरस्यार्थत्वमित्यर्थः॥ अंगिरसमंगानामिति॰ प्राणभावे अंगानां शोषद
र्शनाच्छोषमंगरसत्वमित्यर्थः॥ मुख्यप्राणस्यार्थवत्त्वं प्रकृत्याऽभिहितं॰ यद्यपि तथापि चक्षुरादीनामपि तदंशत्वा
दथर्वशब्दार्थत्वमिति भावः॥ इह इंद्रशब्देन परमेश्वरत्वमुच्यते॰ मघवानित्यनेन तु इंद्र उक्त इति भेदमाह॰ इंद्रः
परमेश्वर इति॰ वीर्येण संहारसामर्थ्येनेत्यर्थः॥ सौम्येनेति॰ विरूपादिरूपेणेत्यर्थः॥ असंस्कृत इति संस्कारही
नो व्रात्य इति स्पष्टतेरित्यर्थः॥ अनेन स्वतः शुद्धत्वं विवक्षितमित्याह॰ स्वभावत एवेति॰ मातरिश्वानिति॰ मात
रिश्वन इत्यत्र नलोपश्छांदस इत्यर्थः॥ वायोस्त्वमिति पितेत्यनुषंगः॥ अस्मिन्व्याख्याने यामुमात्रापि स्वत्वादस्म
दादिसर्वपितृत्वमनुक्तं स्यादत आह॰ अतस्त्वेति॰ अस्मदादिसर्वजनकत्वाद्वायोस्तज्जनकस्य कारणात्मनः प्रा
णस्य सर्वजनकत्वं सिद्धमित्यर्थः॥ वाचि प्रतिष्ठितेति॰ वाचि अपानरूपा तनुः प्रतिष्ठिता श्रोत्रे व्यानरूपा च
(चक्षुषि प्राणरूपा मनसि समानरूपा प्राणस्तत्रोक्तः सव्यानमत्र चक्षुः श्रोत्रं सोपानः सा वाक् समानस्तन्मन इति श्रु
त्यर्थः तेरिति उत्क्रमणेनेति॰ प्राणोत्क्रमणेऽसति अपानाद्यात्मिका वागादिरूपा तनुरशिवा कार्यायोग्या स्यादित्यर्थः॥
प्राणस्य इति॰ ऋगादिमंत्ररूपा प्राणस्य श्रियः ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामिति श्रुतेः॥ सा श्री॰
व्यः प्रसिद्धाः धनाद्यैश्वर्यरूपाः॥ अस्मिन्प्रश्ने निर्धारितं गुणं संग्रहणाह॰ इत्येवमिति॰ इदं वरिष्ठत्वादिरूप हि
लक्षणं॥ ॥द्वितीयः प्रश्नः॥ ॥एवं प्रजापतित्वात्त्वादिगुणजातं निर्धार्य प्राणस्योत्पत्त्यादिकं निर्धारय
न्न तदुपासनं विधातुं प्रश्नांतरमवतारयति॰ अथैनमिति॰ वैदर्भिः प्रश्नांतरमित्यर्थः॥ प्राणैरिति॰ येवागादि

प्राणोऽरकाणामादिभिश्च प्राणस्यत्वसमुपलभ्यते इत्यर्थः॥ प्राणस्य पूर्वोक्तमहिमत्वादेवोत्पत्तिशंकाभावा
त्कुत इति प्रश्नानुपपत्तिमाशंक्याह॥ अतिप्रश्नं तत्वादिति॥ अनेकात्मकत्वात्सावयववादित्यर्थः॥ शरीरग्र
हणमिति॥ शरीरप्रवेशाद्यित्यर्थः॥ प्रातिष्ठतइति॥ आद्यप्रश्नेभ्यो दीर्घत्वं॥ विषमेति॥ विषमं दुर्घटं यथा तथा प्र
श्नाह इत्यर्थः॥ अतिप्रश्नानिति॥ तदन्येषां प्रश्नानतिक्रांतान् अन्यदीयप्रश्नागोचरान् सूक्ष्मप्रश्नान् प्रष्ट
व्यांश्चेनित्यर्थः॥ अतिशायेनेति॥ अपरब्रह्मापेक्षया अतिशायितं मुख्यब्रह्मास्ति त्वमसि श्रोत्साहार्थं स्तोतीभा ति
क॥ दिव्योह्यमूर्तः पुरुषः अक्षरात्परतः परः॥ एतस्माज्जायते प्राण इति मंत्रो अत्रसंवाद्यितुं तत्कृतविशेषणमा
न्याह॥ परस्मादिति॥ अत्रदृष्टांतइति॥ तस्यान्त तदार्थं दृष्टांतउच्यतइत्यर्थः॥ छायेति॥ प्रतिबिंबादिरूपे
त्यर्थः॥ एतस्मिन्निति प्रकृते जनके आत्मनि ब्रह्मणीत्यर्थः॥ कथमायातीत्यस्योत्तरमाह॥ मनोकृतेनेति॥
संदृश्यार्थः॥ तदेव सक्त इति॥ अस्य कर्मिणो मनो यस्मिन्फले निषक्तं संसक्तं आसक्तं सन् तदेव
फलं कर्मणा सह एतीति प्रक्तौ चशरीरग्रहणं साध्यमुक्तमित्यर्थः॥ आत्मानं वा प्रविभज्येत्यस्य उदा
हृष्टांतेनाह॥ यथेति॥ इतरानीति॥ इतरान्चक्षुरादीन् यथास्थानं अक्ष्यादिगोलकादिस्थाने
सन्निधात्ते सन्निधापयति॥ आत्मभेदान्मुख्यप्राणस्य वृत्तिभेदात्प्राणापानादीन्पाय्वादिषु नि
युंक्ते इति द्रष्टव्यं॥ अत्र प्रकृत्या नेत्रादीनां चक्षुरादिस्थानानां स्पष्टत्वात्तानि नोक्तानीति द्रष्टव्यं॥ पा
कुर्वत्स्विति तत्सन्निधत्ते दिनियुक्ते इत्यर्थः॥ मध्ये प्राणापानयोर्मध्ये या नाभिस्तत्स्थः समानः प्रतिति ति
ष्ठति इत्यन्वयः॥ समानशब्दार्थमुक्तं प्रकृत्या स्पष्टं करोति॥ एष हीति॥ आत्मान्यादिविति॥ आत्मनि शरी

कर्मध्

प्र॰मो॰नी॰

रे ॥ अग्निर्जाठराग्निस्तस्मिन्नित्यर्थः॥ एवं चोक्तपदबलादन्नस्य हविष्ट्वं जाठराग्नेराहवनीयत्वं प्रक्षेप
स्य होमत्वं चोक्तं शीर्षण्यसमसद्वारान्निर्गतानां ज्ञानानां अर्चिष्ट्वं च सूचितं तस्मादेता इति वाक्यं व्याचष्टे॰ तस्मा
दिति॰ आसादिति॰ अग्नेरोदर्यहितेः प्राणपरिपाकादन्नरसादन्नं नाडीद्वारा देहं व्याप्तुं नाडीस्थानं हृदयं प्राप्त
दन्नरसादिति शेषः॥ दर्शनद्वयं श्रवणद्वयं घ्राणद्वयं मुखं चैकं रसनमिति सप्तार्चिषः जाठराग्निपाक
जन्यान्नरसबलेन दर्शनादीनां प्रवृत्तेस्तेषु तदर्चिष्ट्वं तदपइत्यर्थः॥ व्यानस्य नाडीरूपं स्थानं दर्शयितुं ना
डीनामुत्पत्तिस्थानं वक्तुमाह॥ हृदीत्यादिना॰ हृदयस्य लिंगात्मस्थानत्वोक्तेः प्रयोजनं तु केचिद्धे भिन्नः॥
नाभिकंदस्य नाड्युत्पत्तिस्थानं वदंति तन्निराकरणं तत्रैव लिंगात्मनः संचरणार्थानां नाड्यः॥ नाडी
भिः प्रत्यवरुध्येत्यादि श्रुतेः॥ नरात्मलिंगात्मनो हृदयस्थानत्वे तत्संचारमार्गभूतनाडीनामपि तद्देवो
त्पत्तिस्थाने [illegible] प्रन्यथा प्रदेशांतरस्थनाडीनां तन्मार्गत्वायोगात्॥
हृदयस्थानेन सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठंत इति श्रुतेश्चेति॰ लिंगशरीरस्यात्मत्वं आत्मोपाधित्वे
न तद्योगादित्याह॥ आत्मनायमिति॰ यस्माल्लिंगात्मा हृदि वर्तते तस्मात्तत्संचारमार्गभूतनाडीनामपि तद्दे
वस्थानमित्याह॥ अत्रेति॰ नाडीनां शरीरविधारकत्वेन प्रसिद्धत्वं वक्तुमेतदिति विशेषणं॰ तस्य स्पष्टत्वा
द्व्याख्यानं न व्याख्यातं॰ एकैकस्या नाड्याः शाखानाड्यः शतं शतं भवंतीत्याह॥ तासामिति॰ तन्नस्त्रिशतो
त्तरमयुतं शाखानाड्य इत्यर्थः॥ शाखानाडीनां च प्रत्येकं द्वाधिकसप्ततिसहस्राणि प्रतिशाखाना
ड्यः संतीत्याह॥ पुनरपीति॰ सप्ततिरिति॰ पदस्य संख्याप्रधानत्वे सहस्राणीत्यस्यतेन सामानाधि

ले

श्री॰ ७

कारणाद्योगात् षष्ठ्यां तद्व्याचष्टे । सहस्राणीति । प्रतिशाखेति । प्रतिशाखाभ्यो निर्गताः अन्यशाखाः प्रति
शाखाः द्वासप्ततिरित्यत्रत्य वीप्सार्थमाह । प्रतिप्रतीति । प्रतिनाडीशतमित्यनेन तदेकैकस्या इत्यनुषंगस्तथा
प्रति प्रति नाडीशतमेकैकस्याः नाड्याः प्रतिशाखानाडीनां द्वासप्ततिसहस्राणि भवंतीत्यर्थः । तथा च मूल
शाखाप्रतिशाखानाड्यो मिलित्वा द्वासप्ततिकोट्यो द्वासप्ततिलक्षाणि दशसहस्रं च शतद्वयमेकोत्त
भवंतीति द्रष्टव्यं एवं नाडीरूपस्य व्यानस्य तत्स्थानमाह । आस्विति । सर्वासु नाडीषु विद्यमानस्य व्यानस्य सु
नस्यकृत्स्नं व्यापकत्वमित्याशंक्य नाडीनां सर्वदेहव्यापित्वे तत्स्थस्यापि व्यानस्य तद्वारा व्याप्तिरित्याह ।
आदित्यादिवेति । यथा आदित्यान्निर्गत्य रश्मयः सर्वगतो गताः न चाहृदयात्सर्वगतो गामिन्यो नाड्यः
स्तास्विति यो यं सामान्येन सर्वशरीरव्यापी वायुविशेषस्तस्य स्थानमाह । संधीति । प्राणेति । उच्छ्वासनिश्वा
न सयोः प्राणापानवृत्त्योरभावे व्यानवृत्तिरूपं वर्तीत्यर्थः । वीर्यवदिति । अथ यः प्राणापानयोः संधिः स व्यान इत्यु
क्त्वा यानि वीर्यवंति कर्माणि बलवता पुरुषेण साध्यानि धनुरायमनादीनि तान्यप्राणन्ननपानन्न व्यानः
करोतीति कृत्यं तत्करोतीत्यर्थः । इदानीमुदानस्य स्थानं वदन्केनोत्क्रमत इत्यस्योत्तरमाह । पात्विति ।
समानाभ्यामिति अनेन पुण्याधिक्ये देवलोके पापाधिक्ये नरकलोकं नयतीति पूर्वव्याख्यातं म
व[illegible]ति । कथं बाह्यमग्निर्यत्नेन कथमध्यात्ममित्यस्योत्तरमाह । आदित्य इति । या देवता प्रसिद्धेति ।
अग्निदेवता पृथिव्यां वायुस्यायतनं अग्निर्लोके इति श्रुतेः रश्मिसंबधाच्चगमादित्यर्थः । अवष्ट
भ्येत्यनंतरं अध्याहारेण वाक्यं पूरयति । आधेयापकर्षणेनेति । तत्रार्थस्तंभादेरूर्ध्वमुत्खन[illegible]

ण र

प्र॰ मा॰ टी॰

प

निरवातस्य परितो क्रियमाणरज्जुनिरुद्ध एवाकर्षणेन पतनाभाववत् अधएवाकर्षणेन शरीरस्य प
तनाभावं सिद्धतीत्यर्थः॰ अनुग्रहमिति॰ शरीरधारणलक्षणमित्यर्थः॰ अन्यथेति॰ पृथिवीदेवता
या विधारणाकरणेन रूत्वादपानेन अधआकर्षणाद्वेसावकाशमस्यादि पतनप्रतिबंधकाभाव
स्य ले पतेदित्यर्थः॰ अंतरा यदाकाश इति वाक्यं व्याचष्टे॰ यदेतदिति॰ यदितिलिंगव्यत्ययं छांदसमि
त्याह॰ यश्चाकाश इति॰ मंचस्य यदितमंचाः क्रोशंतीत्यत्र मंचशब्देन मंचस्था यथोच्यते तथा आ था १
काशशब्देन तत्स्थो वायुर्लक्ष्यत इत्यर्थः॰ स समान इति॰ सामानाधिकरण्यमनुग्राह्यानुग्राहकयोर
भेदोपचारादित्याह॰ समानमनुगृह्णातीति॰ एवमुत्तरत्रापि अनुग्रहहेतुमाह॰ समानस्येति श
रीरांतराकाशस्थत्वे [illegible] समानस्य घावापृथिव्यंतराकाशस्थत्वे बाह्यवायोरिति॰ अंतरा
काशस्थत्वं तयोरेकत्वमित्यर्थः॰ वायुर्व्यानइत्यत्र तु अंतराकाशस्थत्वविशेषवर्हितं वायुसामान्येन समु
प च्चितइति न पूर्वापरेत्याह॰ सामान्येनेति॰ एवमादित्यादिनानारूपेण मुख्यप्राणस्य प्राणापानसमा इति
नोदानव्यानानुग्राहकत्वोक्त्या अध्यात्मं प्राणादिवत्स्यानुग्राहकत्वमुक्तं आदित्याद्याकाशसामा
न्यवायुतेजोरूपी सन्बाह्यपृथिवीदेवमादित्यादिकं धारयतीत्युक्तं तद्वदेव स्वस्थानमेव तद्द्वारेणं प्राण स्त्री॰
पानादीननुगृह्णन् चक्षुराद्यनुग्रहोक्तेन द्वारा तज्जाह्याधिभूतविधात्रं तेनमुक्तं सप्राणस्तज्जुत्साप्राण: ट
सावाकर्षव्यानस्तत्त्वयं समानस्तन्मने स्मरउदानः स वायुरिति निश्चयेन तस्य चक्षुरादीनां प्राणधर्मत्व
त्वोक्तेष्वनुग्राहकत्वोक्त्या चक्षुरादिरूपाध्यात्मं विधारकत्वं चोक्तमिति कथं वा ह्यममिथ्या

६ तेजो ह वाव इति वाक्यं व्याचष्टे यद्वा स्थमिति॰ पूर्वमादिकं विप्रोपतेजः कं
अत्र तेजः सामान्यमुच्यत इति नयोनके स्यमित्याह॰ सा[illegible]त्यास[illegible]मान्यं तेज इति ६

न द सं

तेकथमध्यात्ममित्यस्योत्तरमुक्तमिति द्रष्टव्यं तेजउदानवायुरनुग्राहकत्वं व्यतिरेकेप्रदर्शनेनसाधयति
यस्मादिति. यस्मात्तेजस्स्वभाव उत्क्रान्तिहेतुरुदानवायुर्बाह्यतेजोनुगृहीतः सन्नेव शरीरे वर्त्तते तस्माज्जी
वनहेतुकर्मोपरमे बाह्यतेजोनुग्रहाभावेन उपशान्ततेजाममुमुर्षुर्भवतीत्यन्वयः. स्वाभाविकमिति. जाठ
राग्निकृतं हस्तादिनास्वशरीरस्पर्शे सत्युष्णत्वेनोपलभ्यमानं तेजइत्यर्थः. भवेत्पुनः सद्यतइति भवः शरीरमित्य
र्थः. शरीरान्तरप्रतिपत्तिरस्तमनोः किं यस्यैव न वर्त्ततीति शंकते. कथमिति. इन्द्रियोपाधिवशादित्याह. सदेति.
मनसि संपद्यमानैरिन्द्रियैः सह शरीरान्तरं प्रतिपद्यतइति पूर्वेणान्वयः. उक्तशरीरान्तरप्राप्तिमेव उत्क्रा
न्ति. क्रमप्रदर्शनेन स्पष्टीकर्तुं यच्चित्तइत्यादि वाक्यं तदपेक्षिताध्याहारं कुर्वन्व्याचष्टे. मरणेति.
यच्चित्तेति. यद्देवदेवतीर्यगादिशरीरं सम्यगिति चित्ते यस्य स इत्यर्थः. प्राणं प्रत्यागमनं लौकिकव्यव प्रश्न
हारेण प्रत्ययति. तदेति. तेजसा तेजोनुगृहीतयाउदानवृत्त्येत्यर्थः. एवंभूतः भोक्ता उदानसंयुक्तः प्राणः
कं नयतीत्यपेक्षायां तमेव भोक्तारं नयतीति वदन्वाक्यार्थमाह. सह एवमिति. एवकारस्य तमेवेत्यन्वयः.
यथासंकल्पितमिति. कर्मज्ञानादिसाधनानुष्ठानद्वारा यो कश्चित्तं मरणकाले वासनारूपेण पुनरपि
व्यक्तं लोकं देवादिशरीरमित्यर्थः. एवं प्राणस्वरूपं निर्धार्य तदुपासनं विधत्ते. यः कश्चिदिति. उत्क
त्यादिनिर्वर्णितः विशेष[illegible]णैर्विशिष्टं प्राणमनः प्राणेनायते मनः हेतुभ्यां धर्माधर्माभ्यां शरीरं गृह्णाति प्रा
णानं पञ्चधा विभज्य पायूपस्थयोरपानं स्वस्वरूपं प्राणं चक्षुःश्रोत्रयोर्नासिकायोर्मध्ये समानं नाडीसमूहे व्यानं उदानं चसु
षुम्नायां स्थापयति. उदानेनोत्क्रामतीति बाह्यैः प्राणापानव्यानसमानोदानानुग्राहकैरादित्यपृथिवीदेवता

काशवायुतेजो रूपैरधिदैवमादित्यादिकं आदित्यादिकृतानुग्रहैरध्यात्मं चक्षुर्वाक्श्रोत्रमनस्त्वच भूरसु
त्यादिशरीरमधिभूतं च धारयति · स एवोदान इत्यात्मा भोक्ता चायुक्तो भोक्तारं लोकान्तरं नयति स एव च वरिष्ठः
प्रजापतिरस्ताचेत्येवं प्राणं वेदेत्यर्थः · ऐहिकफलमुक्त्वामुष्मिकमाह · पतितइति · अमृतत्वं च
नात्र मुख्यं किंतु प्राणसायुज्यमेवेत्याह · प्राणेति · इदं तु कामिनः · निष्कामस्य तु चित्तैकाग्र्यं तद्बुद्धिद्वा
रा मुख्यमेवामृतत्वं भवतीति द्रष्टव्यं · आयतिमिति · आयातिमिति द्रष्टव्ये छांदसं ॥ ॥ इति तृतीयः प्रश्नः ॥ ॥ एवं
कर्मविद्याभ्यां तिग्रचलेन विरक्तस्य प्राणविद्यया चित्तैकाग्र्यतद्बुद्धिमतः अतएव साधनचतुष्टयवतो मुख्या तिसि
धिकारिणः परविद्योक्तार्थं प्रश्नत्रयमारभते · अथहैनमिति · पूर्वं विद्ययैवामृतत्वोक्तेरुत्तरप्रश्नारंभोऽनर्थ
र्थः इत्यत आह · प्रश्नत्रयेणेति · संसारमिति · अनेन तन्मुख्यमित्यर्थः · तस्य संसारत्वे व्याकृतत्वं हेतुमा आयतने
ह · व्याकृतविषयइति · व्याकृतमाश्रयं तदंतर्गतमित्यर्थः · साध्यसाधनलक्षणमिति · साध्यसाधनसंबं
धेन लक्ष्यते अभिव्यज्यते उत्पद्यतइति · तथा यद्वा अपरब्रह्मलक्षणः प्राणस्य साध्यसाधनोभयात्मकत्वात्
द्वा तथा तस्मादनित्यमित्यतोऽपि संसारत्वमित्यर्थः · वक्ष्यमाणमात्मानं तत्रेत्याह · साध्येत्यादिना · अतीं
द्रियविषयमिति · इंद्रियविषयत्वमतिक्रांतमिति अव्याकृतमकार्यमित्यर्थः · तत्र हेतुः · अप्राणेति · प्रा श्री०
णगोचरत्वेन तदात्मककर्मेंद्रियागोचरत्वं मनोगोचरत्वेन ज्ञानेंद्रियागोचरत्वमुक्तं सुखरूपतामाह · शिव ६
मिति · निरस्तानर्थत्वमाह · शांतमिति · तत्र भावविकारराहित्यं हेतुमाह · अविकृतमिति · अनेनउत्प
त्तिपरिणामरूपो निषिद्धः · अक्षरंधर्मेति · अक्षरमिति · अक्षयविनाशो निषिद्धो उत्पत्तिनिषेधेन तदनं

प

नरभाव्यस्तित्वं निषिद्धं॥ अत्र सर्वत्र हेतुः॥ सत्यमिति॥ कालत्रयेप्येकरूपमित्यर्थः॥ तत्र अथ प्राप्यत्वात्तदस्य
र मधिगम्यत इत्यादिवाक्यमानमाह॥ परविद्याग्राह्यमिति॥ दिव्यो ह्यमूर्तः पुरुष इति मंत्रमप्याह॥ पुरुषान्वयमि
ति॥ कथं पुरुषशब्दोदितत्वं पूर्णत्वं बाह्याभ्यंतरवस्तुनेदाद्यतमाह॥ स बाह्येति॥ स एव बाह्याभ्यंतरात्मकः तद्व्य
तिरेकेण तदभावे नास्तीत्यर्थः॥ प्रपंचत्रयमिति॥ यद्यपि पंचमप्रश्नोपनिषदि विषय एव प्रणवोपास्तिविषयत्वा
त्॥ तथापि तस्य क्रममुक्तिफलत्वेन निर्विशेषात्मन्येव सर्वविशेषप्रविलापनद्वारा पर्यवसानात्सोपि परविषय ए
वेति भावः॥ एवं सामान्येन प्रश्नत्रयस्यापि संबंधमुक्त्वा चतुर्थप्रश्नस्य प्रातिस्विकसंबंधमाह॥ तत्रेति॥ यस्मा
दित्यस्य किं वा तदस्तीति॥ तत्र तृतीयः॥ उक्तमिति॥ यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्र
भवंते सरूपाः॥ तथाक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंतीति मंत्रेणेत्यर्थः॥ एतद्विवक्षये
ति॥ मंत्रोक्तार्थविस्तारानुवादित्वादस्य ब्राह्मणस्येति भावः॥ प्रश्नोत्तरस्वरूपस्यैव विवक्षितत्वात्तन्निरूप
णार्थं कानि स्वपंतीत्यादि प्रश्नाः॥ जागरितादीनां धर्मिविशेषनिर्धारणार्थः॥ अन्यथा तेषामात्मधर्मत्वशंका
यां तन्निर्विशेषत्वनिर्णयासिद्धेः॥ भावानां स्वरूपविभागादिविवक्षायां तु ताः पुनरुदयतः प्रचरंतीति दृष्टांतव
शात्तत्रैकीभावः॥ ततो विभागेन निर्गमनमित्युपसंहारे एकीभूतानां पृथिव्यादिकार्यकारणानां अक्षरा
द्विभागप्रतीतेः॥ तावन्मात्रेणाभाव्य उक्तेति द्रष्टव्यं॥ तत्राद्यप्रश्नेन जागरितस्य धर्मी पृष्टः॥ स्वप्ने य
स्य व्यापारोपरमे जागरितं नास्ति स तस्य धर्मी इति निश्चेतुं शक्यत्वात्॥ द्वितीयेन अवस्थात्रयेपि शरीर
रक्षणं कस्य धर्म इति पृष्टं॥ जागरितेनुपरते व्यापारस्य प्राणस्य देहरक्षत्वोपपत्तेः॥ तृतीयेन स्वप्नस्य

प्र.ना.ना.

धर्मी एव सः· चतुर्थेन सुषुप्तिधाम्नि सुखमहमस्वाप्समिति सुप्तोत्थितस्य परामर्शात् सुखस्य सुषुप्तिसंबंधाव
गमात्· पंचमप्रश्नेन अवस्थात्रयविनिर्मुक्तमवस्थात्रयपर्यवसानभूमिरूपं तुरीयमक्षरं दृष्टमिति विवे
कः· कार्येति· कार्यं शरीरं प्राणा वा करणं निमन्नादीनि पदार्थानुक्त्वा वाक्यार्थं पिंडीकृत्याह· तत्किमि
ति· तत्स्वदं पूर्वापरयोः संबध्यते· प्रसन्नमिति· विषयसंपर्ककालुष्यरहितं· निरायासेन विक्षेपाभावमात्रेण
लक्ष्यते· अभिव्यज्यते निवातस्थदीपवत्· दीपालोकवत्· अनाबाधं विना शरीरहितं सत्यमालस्य रूपमित्यर्थः·
एतदिति· सुषुप्तस्य काशमानं सुखमहमस्वाप्समिति परामर्शमर्हतमित्यर्थः· तस्मिन्काल इति· यद्यपि पंच ल
मेन प्रश्नेन तुरीयं पृष्टं तेन सुषुप्तिस्तथापि संसारदशायां सर्वोपाधिरहिततुरीयावस्थाभावेन विवेकतएव तस्य प्र
दर्शनीयत्वात्तत्र सुषुप्त्यावस्थाने सत्यधिष्ठितरोपाधिराहित्येन तत्रैव सर्वोपाधिविवेककरणेन तुरीयप्रदर्शनस्य सु
करत्वात्तस्मिन्काले तुरीयप्रदर्शनार्थं सर्वसंप्रतिष्ठोक्तेति सम्यगेकीभूता इति तदात्मभावप्राप्त्या विलयं गता इत्य
र्थः· मधुररसवदिति· यथा नानापुष्परसा मधुनि एकीभवंति तद्वदित्यर्थः· विवेकाभावमात्रेण दृष्टांतावुक्तौ तत्र
सर्वात्मनात्वयाभावादित्याह· विवेकानर्हा इति· पूर्वं विवेकानर्हाः संतः पश्चात्संप्रतिष्ठिता इत्यर्थः· न चानेना
अविद्या पि प्रश्नेन बासनानिरवविवेकः सो सुषुप्त एव दृष्ट इति शंक्यं· परे आत्मन्यक्षरे संप्रतिष्ठंत इति वक्ष्यमाणत्वात्सुषुप्ते श्री
च अज्ञाने एव संप्रतिष्ठानादेष हि द्रष्टेत्यादि प्रज्ञा न प्रतिबिंबितस्य जो रूपाधिसंप्रतिष्ठायामभिधास्य १०
ख्या मानत्वाद छायमित्यस्य ज्ञाना भा वो के अत्र तुरीयमेव दृष्टमिति भावः· ननु कार्यकारणव्यतिरिक्ते
संप्रतिष्ठानाधिकरणोऽस्मामान्येन कस्मिंश्चिदवगते कस्मिन्प्रतितिष्ठतीति विशेषप्रश्नो घटते न च

तस्यावगतिरस्तिनचसंघातिष्ठानस्य साधिकरणत्वेन सामान्येनाधिकरणावगतिरस्तीति वाच्यं तत्तदुपा
दानानामेवाचेतनानां तदधिकरणत्वेन तदतिरिक्तस्याचेतनस्यासिद्धेरिति शंकते. नन्विति. दात्रंना
मसत्स्यादिस्त्ववनार्थः शास्त्रविशेषः. स्वात्मनीति. स्वोपादानइत्यर्थः. सुखदुःखपुरुषाणां करणानामिति.
सुखदुःखपुरुषाणां यानि करणानि तेषामित्यर्थः. एवं हि दृष्टेत्यादिना पुरुषाणां मध्ये कोभावस्य वक्ष्यमा
णत्वाद्दु पुरुषाणामित्युक्तं. अस्मिन्पक्षे करणानां चेति चकारोद्रष्टव्यः. प्रष्टुः शंकायाः कुतः प्राप्ति
रित्यन्वयः। संहतानांपरार्थत्वेन व्याप्तेस्तत्संहतत्वेन हेतुना परस्मिन्नचेतने सामान्येनावगते प्रष्टु
र्विशेषप्रश्नोयुक्तइत्याह. युक्तैवेति. स्वाम्यर्थानि संघातोभिमान्यर्थानीत्यर्थः. आशंकानुरूपइति.
मनसि विशेषानाशंकानुरूपोवाचिकः प्रश्नइत्यर्थः. अत्रसंघातनिष्ठानविशिष्टआत्मानद्रष्टः किंतु
तदुपस्थापितत्वेन लक्ष्यात्मास्पष्ट इति वाक्यतात्पर्यमाह. अत्रैवेति. भवंतीत्यनंतरं स्पष्टमिति शेषः.
पञ्चयात्रस्पष्टं तन्त्रेणुइत्यन्वयः. तस्यैवार्कस्य सामग्रीचयइत्यन्वयः. विकीर्यतइति. इत्यादिदुर्विलिप्यं
तइत्यर्थः. स्वप्नेपि चक्षुरादिव्यापारोपलब्धेरेकीभावोऽसिद्धइत्याशंकावासनामयेंद्रियव्यापारोप
शब्दादि लब्धावपि बाह्यश्रवणादिव्यापाराभावेन तत्साधयितुं तेनेतिवाक्यं व्याख्याति. यस्मादिति. श्रोत्रादी
नामेकीभावो नाम स्वस्वव्यापारं विहाय मनस्तं[illegible]त्रतयावस्थानमात्रं न तु मुख्यमेकत्वं तेषां मनः प्रकृति
कत्वाभावेन अप्रकृतौ[illegible] तदनुपपत्तेरित्यभिप्रेत्य एवकारः प्रयुक्तः. नेयाय ततइति इत्योर्यंगतेरस्य रूपमे
तम्[illegible]न्तगच्छतीत्यर्थः. कानि स्वपंतीत्यस्य सविषयाणि बाह्यकरणानि स्वपंति उपरमंते अतस्तेषामेव

जागरणं धर्म इत्युत्तरसूत्राकान्निजायतीत्यस्योत्तरमाह॥ सुप्तवस्विति॥ प्राणानामग्निरूपं गौणमित्याह॥
अत्र प्रपदद्यति॥ अपानस्य गार्हपत्यत्वे यज्ञाद्गार्हपत्यात्प्रणीयते प्रणयनादिति वा स्वंयम्य वह्नित्वमपि हेतुत्वेन
योजयति॥ यस्मादिति॥ प्रणयनादिति पदं गार्हपत्यविशेषणमित्याह॥ प्रणयनो गार्हपत्य इति॥ तत्सं
दृष्टं आहवनीयः प्राणाहुतिर्वा वक्ष्यमाणत्वात्याभिधानपूर्वं व्याचष्टे॥ तथेति॥ गार्हपत्यत्वेनोक्ते अपाने प्र
तर्णछति सति वह्निर्गच्छन्प्राणस्ततो निर्ग[illegible]तइव लक्ष्यत इति प्राण आहवनीय इत्यर्थः॥ परित्यक्तं प्रि:शं
व्यानोन्वाहार्यपचनइति वाक्यं हृदा नीत्वा व्याचष्टे॥ व्यानस्विति॥ छांदोग्ये गायत्रीविद्यायां तस्य वा एतस्य
हृदयस्य पंचदेवसुषय इत्युपक्रम्य अथ योस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रमित्यनेन व्यानस्य
स दक्षिणसुषितो निर्गमनमुक्तमित्य[illegible]न्वाहार्यपचनेनसादृश्यं दक्षिणदिक्संबंधित्वं व्यानस्येति सोन्वाहा
र्यपचनइत्यर्थः॥ अत्र चेति॥ अग्निहोत्रस्य होता होमस्य कर्ता अस्ति कुत्र उच्यते तत्र वाक्ये नेति शेषः॥
अत्र उच्छ्वासनिश्वासयोराहुतित्वस्य पूर्वसिद्धत्वेन सिद्धवन्निर्देशाद्योगस्तत्समान इतिनलद्व्याननन्व
द. यात्रयावाक्यत्रयं हृत्वा अन्वयपत्रयेण योजयति॥ यस्मादिति॥ उच्छ्वासनिश्वासावित्यनंतरमाहुती इति प श्री० ११
दं भाष्ये अध्याहृत्य एतावुच्छ्वासनिश्वासो आहुती आहवनीयाधिकरणाग्निहोत्राहुतीचत्र हुतत्वेसा
म्यादेवेत्येकोन्वयः॥ अनंतरं भाष्ये तु शब्दश्चार्थे प्रकृतिगत हुतिशब्दस्तस्मादित्यर्थे यस्मादेतावाहुती होत्रे २
यस्माच्चाएतो समं नयति शरीरस्थितिभावाय साम्यं नयति प्रवर्तयति यो वायुः॥ यथा अग्निर्होमकर्ता
आहुतिद्वयं आहवनीये जुहोति स मन्नयति प्रापयति न हुतस्मादाहुत्योर्नेतृत्वात् स वायुर्होतेतियद्

तस्यावगतिरस्ति न च संघतिष्ठा तस्य साधिकरणत्वेन सामान्येनाधिकरणावगतिरस्तीति वाच्यं तत्तदुपा
दानानामेवाचेतनानां तदधिकरणत्वेन तदतिरिक्तस्याचेतनस्यासिद्धेरिति शंकते· नन्विति· दात्रं ना
मसस्यादिलवनार्थः शस्त्रविशेषः· स्वात्मनीति· स्वोपादान इत्यर्थः· सुखदुःखपुरुषाणां करणानामिति·
सुखदुःखपुरुषाणां यानि करणानि तेषामित्यर्थः· एवं हि दृष्टेत्यादिना पुरुषाणां मध्ये कीभावस्य वक्ष्यमा
णत्वाद्धि पुरुषाणामित्युक्तं· अस्मिन्पक्षे करणानां चेति चकारोऽध्याहर्तव्यः· प्रष्टुः शंकायाः कुतः प्राप्ति
रित्यन्वयः। संहतानां परार्थत्वेन व्याप्तत्वात् संहतत्वेन हेतुना परस्मिन्नचेतने सामान्येनावगते प्रष्टु
विशेषप्रश्ने युक्त इत्याह· युक्ते वेति· साम्यर्थानि संघातोभिमान्यर्थानीत्यर्थः· आशंकानुरूप इति·
मनसि विद्यमाना शंकानुरूपो वाचिकः प्रश्न इत्यर्थः· अत्र संप्रतिपत्तावविशिष्ट आत्मा न दृष्टः किं तु
तदुपलक्षित केवल आत्मा स्पष्ट इति वाक्यतात्पर्यमाह· अत्रेति· भवतीत्यनंतरं स्पष्टमिति शेषः·
यत्र या स्पष्टं न चक्षुरित्यन्वयः· तस्यैवार्कस्य सामरीचय इत्यन्वयः· विकीर्यत इति· इत्यादिसु विक्षिप्यं
तइत्यर्थः· स्वप्नेपि चक्षुरादिव्यापारोपलब्धेरेकीभावोऽसिद्ध इत्याशंक्य वासनामयेंद्रियव्यापारोप
शब्दादि लब्धावपि बाह्यश्रवणादिव्यापाराभावेन तं साधयितुं तेनेति वाक्यं व्याख्याति· यस्मादिति· अत्राचादी
नामैकीभावो नाम स्वस्वव्यापारं विहाय मनस्त्वे चतयावस्थानमात्रं न तु मुख्यमेकत्वं तेषां मनःप्रकृति
कत्वाभावेन अप्रकृतौ तदनुपपत्तेरित्यभिप्रेत्याह एवकारः प्रयुक्तः· नेयायत इति इलोयं गतेरस्य सूक्ष्मे
तन्न गच्छतीत्यर्थः· कानि स्वपंतीत्यस्य सविषयाणि बाह्यकरणानि स्वपंति उपरमंते अतस्तेषामेव

त्रई-२

ऽव होतृशब्दाध्याहारेण द्वितीयोऽन्वयः॰ कोऽसौ वायुरिति तीद्धशेषप्रश्ने स होता वायुः स समान इति तृतीयोऽन्वयः॰ —
इति विभागः॰ ननु प्राणस्य एतस्य च सर्वेषां प्राणानामग्नित्वोक्तेः कथमिह समानस्य होतृत्वमुच्यत इति प्राशं
क्यां कं अग्निस्थानियोपीति भावः॰ अग्नित्वेनोक्तोपीत्यर्थः॰ होता चेति चोवधारणे होतैवेत्यर्थः॰ आकृतिनेत्य
न्यात अहोतृत्वे स्थिते अग्नित्वोक्तिः छत्रिन्यायेन अन्यनाग्निसमुदाये लाक्षणिकीत्यर्थः॰ अवस्थात्रयवर्तिना
मुख्यसन्निधौ सप्राणानां चाग्निहोत्रावयवत्वसंपादनस्य नोपासनं प्रयोजनं निर्विशेषा सप्रकरणत्वात् तद्धि
ध्यादर्शनाद्धि किं तु इंद्रियाण्युपरमंते प्राणा जाग्रतीत्येवं त्वंपदार्थशोधनरूपस्य ज्ञानस्य स्तुतिरेवेत्याह॰ अतो
ऽत्रेति॰ सर्वदेति वाजसनेयके हृत्याङ्कितः प्राणश्चित्रः मनश्चित् इत्यादिना सर्वप्राणव्यापारेषु प्रत्येकमग्नि
चित्त्वदृष्टिं विधाय एवं दृष्टिमतः सर्वाणि भूतानि अस्य स्वापकालेऽपि चयनं कुर्वंतीति स्वापदृष्टिस्तुता तद्वदि
हापीत्यर्थः॰ अत्र हीति॰ अत्र मनो यजमानं ब्रह्मेत्युच्यत इति व्यवहितान्वयः॰ तत्करणनायीह तु हृदयमाह॰ यज
मानवदिति॰ हेतुद्वयं साधयति॰ इष्टं त्विति॰ अत्र स्वप्नकाले विषयानुकरणानि चोपसंहृत्य मनो जा
ग्रति प्राधान्येन स्वव्यापारं कुर्वद्वर्तते अग्निहोत्रफलं स्वर्गं जिगमिषुर्यजमानवत्सुषुप्तिकाले स्वर्गरूप
ब्रह्म जिगमिषुश्च मन इत्यन्वयः॰ भाष्ये यजमानद्व्यनंतरमिव शब्दो द्रष्टव्यः॰ इवावशब्देन रात्स्प्रसिद्धिर्गु
कं॰ इष्टेति उदाननिमित्तकमरणानंतरं यागादिफलप्राप्तेस्तस्य तन्निमित्तत्वात् तत्कारणेकोऽपि चारादुदानः इष्ट
फलत्वेन कल्प्यत इत्यर्थः॰ न केवलं मरणद्वारा यागफलप्रापकः समुदानस्य किं तु एतस्यैवानंदस्यान्या
नि भूतानि मात्रामुपजीवंतीति श्रुतेः सर्वयागफलरूपनामपि ब्रह्मलोकस्य तद्धि स प्रापकत्वादपि अहरह
रिष्टफलं प्रापकसमुदानस्येति अपूर्वकमाह॰ कथमिति॰ स्वर्गमिवेति स्वर्गमेवेत्यर्थः॰ सर्वयागफला

त्मकस्वरूपमेव ब्रह्माक्षरं गमयतीत्यर्थः॥ यद्यपि अहरहर्ब्रह्मप्राप्तिर्यागसाध्या यागरहितानामपि तत्प्राप्तेः
तथापि ब्रह्मलय एव सर्वयागफलत्वेन तत्प्रापकस्योदानस्यैव फलप्रापकत्वमस्तीति भावः॥ ननु उदानस्य कथं तत्प्रा
पकत्वमिति शंक्यं॥ तस्य सुषुम्नानाडीचारित्वेन सः मनस्तन्नाड्यां प्रवेशयन्नन्ते कृत ब्रह्म प्रापयतीत्युपपत्तेः॥ ननु गार्ह
पत्यो वा एषोऽपान इत्यारभ्य मनो ह वाव यजमान इत्येतेन ग्रंथेन विदुषाम् अग्निहोत्रस्य कर्मीन भवतीति सूच्यत इत्युक्तं अस्त्वेवं
तथापि अग्निहोत्रादि कर्मप्रवृत्ते तेरुदानस्य यागफलस्थानीयत्वोक्तेस्तु न तत्फले तत्र कर्मप्रवृत्तेरित्याह॥ एवं विदुष इति॥
विदुषोइति॥ श्रोत्रादीनि स्वप्ने उपरमन्ते प्राण एव जागर्तीत्येवं रूपा विद्येत्यर्थः॥ अस्याः विद्यायाः जागरणं श्रो
त्रादि बाह्येंद्रियधर्मः शरीररक्षणं प्राणधर्म इत्येवं संपदार्थविवेकरूपत्वात् तस्योत्तरवाक्ये उपपत्तिः॥ अतएव प्राणजा
गरणस्य विद्वत्साधारणत्वात् कथं विद्वत्स्तुतिरित्यपि शंका निरस्ता तस्यैवं भूतविवेकाभावादिति॥ ननु विद्या
करणत्वादस्य विदुषः श्रोत्राद्युपरमादिकं सर्वं भवतीति विधीयतां किं स्तुत्येत्याशंक्य विद्वदविद्वत्साधारण्ये
न स्वयमेव भवतो न विधेयत्वमित्याह॥ नहीति॥ विद्वतोऽस्कतिरेवेति श्रोत्रादिकं परे देवे मनस्येकी भवति प्राणाग्न
यो जाग्रतीत्यत्र पदार्थविवेकरूपं ज्ञानं विवक्षितं गार्हपत्यो वा एषोऽपान इत्यादिना सूच्यत इत्युक्तप्रकारेण
त्यर्थः॥ तृतीयप्रश्नोत्तरत्वेन कतर एष इत्यादि सर्वः॥ पश्यतीत्यं तं व्याचष्टे॥ यदिति॥ कतर इति॥ अत्रेति श्रोत्रं १४ श्री० १२
पदं गृहीत्वा व्याचष्टे उपरतेष्वित्यादिना तेषां स्वरूपं तेन॥ अनेकेति॥ विषयविषयप्राधान्ये कर्मभावगमनमित्यर्थः॥
इदं च मद्ब्रह्म व्याख्यानं स्वप्नद्रष्टुः जीवस्य स्वातंत्र्येव रूप्यते देवशब्दितमनसस्तु किं स्वप्नो मनोधर्मो नात्मधर्मः॥ अपि स
स्त्र्यनिलुत दारोपमात्रं लोकस्य तिरव्यापनार्थे इति शंकापरिहाराभ्यामाह॥ नचेति॥ मन उपाधि कृतमिति॥ बा
ह्येंद्रियप्रमुखमन उपाधिकृतं जागरणं केवलमन उपाधिकृतं स्वप्न इत्यर्थः॥ स्वप्नस्य धीशब्दवाच्यमनः प

परिणामस्यात्स्वप्ने भूत्वेति प्रकृतेः सामानाधिकरण्यनिर्देश इति द्रष्टव्यं॥ ननु द्वयं प्रकृतिः विरुद्ध्यत्युभयेनैत्स्वा
तंत्र्यवक्तुं न शक्यते इति प्रकृत्यैतद्विरोधापत्तेः अतोऽन्यदेव शब्दे न स्ते जेतु एवोच्यते तत्रस्यैव स्वतः स्वातंत्र्यमिति शं
कते· मन इति· स्वयं ज्योतिष्ट्वमिति· स्वयंज्योतिष्ट्वबोधकप्रकृतिरित्यर्थः॥ अन्यथा द्वितीयं सहायेपि दीपादीना
तस्य ८ मिव वास्तवस्य बाधाभावादिति· अत्र किं मनसः सहायेऽज्योतिरंतरस्य मनसो विद्यमानत्वादात्मनः स्वयं
ज्योतिष्ट्वबोधनं न शक्यमिति प्रकृति· कार्यस्य बोधनस्य बाधोऽभिप्रेतोऽउत तद्बोधनरूपकार्यसिद्ध्यर्थं मनसो
ऽभावोपि विवक्षितः॥ प्रकृतोत्तरप्रश्नेऽसत्यत्वेप्रकृत्यर्थबाध इति प्रथमाद्यः॥ मनसि सत्यपि एवं तदेति चे
न द्यमानशरीरत्या मनसो दृश्यत्वेन ज्योतिष्ट्वायोगेऽप्यात्मन एव स्वयंज्योतिष्ट्वस्य बोधयितुं शक्यत्वा[illegible]
दित्याह· तन्नेति· न द्वितीयः तदानीं मनसोऽप्यावश्यकत्वप्रकृत्यर्थ एव न भवतीत्याह· प्रकृत्यर्थेति· आत्मनोऽज्यो
तिष्ट्वबोधनात्मकव्यवहारस्य प्रकाशापेक्षत्वात्तस्मिन्सत्येव तद्बोधसाधने मन आदौ च सत्येव त
द्बोधयितुं शक्यते नान्यथेति मन आद्यभावो न प्रकृतो विवक्षितः· तथा सति तद्बोधनाशक्तेरित्याह· प
स्मादिति· तत्र मानमाह· यत्रवेति· द्वितीयाभावो व्यवहारो नास्तीत्यत्रापि मानमाह· मात्रेति· द्वयं
सं मात्राशब्दार्थः· असंसर्ग इति छेदः द्वयोः संसर्गस्तु तत्तौ विशेषविज्ञानाभावो तेया द्वितीयाभावे व्यव यं
हारो नास्तीत्यर्थः· अतो न द्वितीयः कल्पः संभवतीत्याह· अत इति· ननु यदि स्वज्योतिष्ट्वबोधना
र्थं मन आद्यभावो नापेक्षितः जागरितेपि सहितद्बोधनं संभवादत्रैतिस्वप्नवाचि विशेषणमन
र्थकमिति शंकते· नन्विति· किं विशेषणबलान्मनसोऽभावः सिसाधयिषितः उत विशेषणस्यगति
मात्र

प्र.भा.ना.

मात्रं प्र[illegible]च्यते नाद्यः मनसो ऽभावांगीकारेपि अंतर्हृदयस्याकाशस्य तत्परिच्छेदस्य च स्फूर्तिसिद्धत्वे
न तन्मतेपि तत्र स्वयंज्योतिष्ट्वबोधनासंभवात् [illegible] नर्थक्यं तुल्यमित्याह । प्रत्यगात्मेति ।
परिच्छेदोधिकोऽत्रेत्यत्र इति । तदर्थः प्रयोगः स्वयंज्योतिष्ट्वमिति तद्बोधनमित्यर्थः । यथाश्रुतेवास्तवस्य तस्य बो
धस्याशक्यत्वादिति । यद्यपि स्वप्ने अंतर्हृदयाकाशस्य बाह्यस्य च स्वयंज्योतिष्ट्वं बोधयितुं न शक्यमिति तद
वस्थयोः तथापि स्वप्ने मनसो ऽभावेन तद्बोधने प्रतिबंधकस्य [illegible]स्याभावात् दूरे विप्रकर्षेण स्वयंज्योतिष्ट्वं बोध स्वप्ने
यितुं शक्यमिति [illegible] तद्दूषणम
प्यवेदितिशंकते । सत्यमिति । स्यादित्यनंतरं तथापीति शेषः । केवलतयेति । मनसो ऽभावेनेत्यर्थः । भारस्येति । प्रति
बंधस्येत्यर्थः । शेषबोधने तु सुषुप्ते भविष्यतीत्यभिप्रायः । एवं तर्हि सुषुप्ते सर्वस्याप्यभावमात्रमित्यसम्यग्बोध
के नेरिव रूपाणीयं । न च तत्तत्संभवति तत्रापि बुद्धेः प्रतिबंधकस्य विद्यमानत्वादित्याह । न तत्रापीति । सुषुप्तेपी
चे त्यर्थः । तत्रापीति । स्वप्नेपीत्यर्थः । सुषुप्ते सर्वभावापनयस्यान्तदा स्वप्ने अर्थभावापनयाभिप्रायो वर्णयि
तुं शक्यते । न च तदस्ति । अतो ऽत्रैतावविशेषणं तदाप्यनर्थकमित्यर्थः [illegible] तर्हि विशेषणस्य गतिर्वक्तव्येति द्वि
तीयं शंकते । कथं तर्हीति । अत्रेष्टदेवस्वप्नेमहिमानमनुभवतीति अथर्वशाखावाक्यार्थकथनावसरे का श्री
एव प्रकृतिस्तत्र विशेषणस्य गतिर्न वक्तव्या प्रकृतानुपयोगादिति सिद्धांत्येकदेशी कश्चिच्चोदः शंकते । अन्येति १२
सर्ववेदांतप्रत्ययन्यायेनाथर्वश्रुत्यविरोधेन एकवाक्यतया शाखांतरस्य [illegible]नीयत्वात् तदविरोधोऽपि वक्त
व्य इति पूर्ववाद्याह । नार्थकस्येति । तर्हि का एवं प्रकृतिर[illegible]वाक्यजेत्याशंक्याह । [illegible]र्थेति । स्वाध्या
योध्येतव्य इति अध्ययनविधेरर्थावबोधफलकत्वात् तुल्यं च सर्वोऽपि दार्थिकमिति न्यायाच्च अक्षरमात्रस्या

प्यनर्थक्यात्प्रयोगादित्यर्थः एवमेकदेशिनि दूषिते सिद्धान्तमुत्तरमाह स्वयं तदीति तर्ह्यादावेव मुख्यश्रुत्यर्थ
उच्यतां किं पूर्वोक्तरीत्या पक्षान्तराश्रयेण कारणान्तरेण करणस्याभिमित्याशंक्य पक्षं उत्थाप्य निराकरणवतः यथावदर्थबो
धे अनधिकारात्तस्यानर्दनिमानावतारं चिकीर्षया तदीयनानापक्षानिराकृत्याइति वक्तुं सर्वमभिमानं निर
स्येत्याद्युक्तं स्वयंज्योतिष्ट्वं श्रुतेरनतिमान्यक्तौ तद्वक्तास्वप्नस्योहृदयाकाशादिसत्त्वेपि तत्त्वं बंधप्रतीत्यभावा
द्विद्यमानस्यापि अविद्यमानतुल्यत्वेनात्मनः केवलत्वान्नुकाशादर्शनाच्च स्वयंज्योतिष्ट्वमिति बोधनीयं मनसो
भावादिनापि एवं मनसि सत्यपि तस्य वासनामयत्वात् जन्तुरगार्विरयं तथापरिणामादृश्यत्वाच्च दृष्टत्वतो
भेदेन विवेकतः कृत्यात्स्वप्रकाशत्वं बोध्यमित्याह यथेत्यादिना मनसीति सत्यपीति शेषः ननु मनसो
दविद्यादिनिमित्तवशाज्जन्तुरगादिरूपेण निव्यक्तेर्वासनावशाद् जायतीव तस्या इहतथैव प्रतीतिस्या
त्तद्रूपतयाऽऽत्मनः आह कर्मनिमित्तेति तथाप्रतीतिं विनास्वप्नभोगासिद्धेः स्वप्नभोगप्रदकर्मनिमित्तवशा
ज्जाग्रति गन्धादीनामिदं तथानुभवेन तद्वासनानामपि तथैवानुभवात् तेन तद्वासनारूपा विद्या च पश्यत्वात्
नाम्रयस्य मनसइदं तथैव ज्ञातरवस्तुतीतिरित्यर्थः इदं च विशेषणं मनसो विषयत्वेन विषयित्वासंभवाद्धृष
यिण आत्मन एव प्रकाशरूपत्वमिति वक्तुं जाग्रति मध्यादि त्यादि कार्यज्योतिषां चक्षुरादिकरणज्योतिषां च
सत्त्वेन तत्संकीर्णत्वेन आत्मनः स्वयंज्योतिष्ट्वं दुर्बोधं स्वप्ने तु तदभावात्सुबोधमिति वक्तुं सर्वकार्ये
त्यादिविशेषणं स्वप्ने आदित्यादिकार्यकरणज्योतिषामभावमाने तेपि तेषां वासनामात्रेण दृश्यत्वाच्च
विषयत्वेनाज्ञानासामर्थ्यमिति वक्तुं वासनामात्ये त्यादिविशेषणं एते अविशेषणे स्वप्न एव एवं च तेरेच
यं ज्योतिष्ट्वस्य बोधयितुं शक्यत्वादन्यत्रासंभवादेत्रायमिति श्रुतौ स्वप्नविशेषणग्रहणमर्थवदित्युक्तम्

तिद्रष्टव्यं स्वयं ऽयोतिष्टुभितिस्विद्धमिति शेषः॰ अत एव स्वकौवस्वप्रेमनसः अभावविवक्षा कारणाभा
वेन तद्विरोधाभावान्॰ अत्र देवशब्देन परे देवे मस्येकीभवतीत्युक्तं मन एवोच्यत इत्युक्तमुपसंहरति॰
तस्मादिति॰ तन्निर्विद्रियाणामुपरतत्वाद्विषयसंबंधाभावात्कथं मनसो महिमानुभवइतिशंकते॰ कथमि
ति॰ पूर्वज्ञातस्येव स्वप्नज्ञानारास्यवासनामात्रत्वमतो नेंद्रियापेक्षेत्याह॰ उच्यत इति॰ यदीति॰ यन्मित्रं
पुत्रं वा पूर्वं दृष्टवान्तं देवदत्तं पुत्रमित्रादिविषयवासनासमुद्भूतं मित्रं पुत्रं वाऽविद्ययावपश्यतीति द्रष्ट
वानित्याद्विपदाध्याहारेणवाक्यं योऽयमन्यथा पुत्रमितिद्वितीयापाठे वक्ष्यस्य चानन्वयः स्यादिति चेत्क
र्तृभावेन दर्शनाप्येतान्यन्वयीत्युक्तं॰ तथेति॰ अत्रापि योर्थः श्रुतः तमेव श्रुतमर्थमित्यध्याहारेणैव श्रुतिर्यो
ज्यारेखानदीतीरादिः देशान्तरादिरिति भावः॰ प्रत्यनुभूतं प्रतिवारमनुभूतं पुनः पुनरनेकदिनेषु अने
कस्वप्नेष्वनुभवमित्यर्थः॰ जन्मांतरदृष्टमिति व्याख्यानेहेतुमाह॰ असंतमिति॰ अननुभूतं चेत्यस्य स्वप्र
त्यनुभूतमित्यनेन पुनरुक्तिमाशंक्याह॰ केवलेनेति॰ पूर्वमिंद्रियद्वारकानुभवउक्त इत्यपौनरुक्त्यमित्य
र्थः॰ सर्वदर्शने हेतुमाह॰ ~~असंतमिति॰ अननुभूतं चेत्यस्य प्रत्यनुभूतमित्यनेन पुनरुक्तिमाशंक्याह॰ के~~
~~वलेनेति॰ पूर्वमिंद्रियद्वारकानुभवउक्त इत्यपौनरुक्त्यमित्यर्थः॰ सर्वदर्शने हेतुमाह॰ असंतमिति~~ श्री॰
सर्व इति॰ कस्मै सकलकरणं भवतीत्यस्योत्तरं तदपेक्षितं वदन्नाह॰ स यदेति॰ पित्ताख्येनेति॰ इदमुपलक्षणं १४
श्लेष्मणाद्वेत्यपि द्रष्टव्यं तन्मनः प्राणमेवोपसृष्यत इति श्रुत्यंतरे प्राणशब्दितेन तुल्यत्वेन ते
स्वप्नलयाभिधानात्तिरस्कृतेति वासनाभिव्यक्तौ द्वारं स्वप्नभोगप्रदं कर्म तत्तिरस्कृतं तन्न अनुपरतं भवतीति ते
जः शब्दितेऽस्मिन् चैतन्यसंबंधं वर्णदित्यर्थः॰ रश्मय इति॰ वासना इत्यर्थः॰ अविद्योपविद्यानेति॰ सामान्यत

सामान्यचैतन्यरूपेणेत्यर्थः। चेतनाशक्तिः सामान्यवृत्तिरूपेण वा अनेनैव सुषुप्तमुक्तमित्याह। तदेति। नन्व
चेतनस्य सुखं भवतीत्ययुक्तं जन्यस्य सुखस्य तदानीमसंभवात् स्वरूपसुखस्य पूर्वमपि सत्त्वेन तदा भवतीत्यनुपपत्ते
रित्याशंक्य स्वरूपसुखमेव विशेषविज्ञानरूपविक्षेपाभावेन विलसद्दीपप्रभावत्सम्यक्प्रकाशते तदयमेत
द्वचनमित्याह। यद्विज्ञानमिति। विज्ञानरूपं स्वरूपसुखमित्यर्थः। अनेनानंदमयकोशशब्दितमानंदमभिव्य
क्तं मनआदिवासनावद्ज्ञानं सुषुप्तप्रथमीत्युक्तं। पंचमप्रश्नस्योत्तरं तुरीयस्वरूपं विवेकसौकर्याद्द्विविधात्मैवो
च्यत इत्याह। एतस्मिन्निति। अन्यथेति। पूर्वमन्यथाविभाव्यमानमित्यर्थः। मात्रानुप्रवेशेनेति। मात्राणां विवे
कतः आत्मस्वरूपेऽनुप्रवेशेनेत्यर्थः। आपोमयः इत्यत्र विभक्त्यलोपश्छांदसः। स्थूलानि चेति पंचीकृतानि चेत्य
र्थः। तत्र पंचीकरणमेतच्छ्रुतिसिद्धमित्युक्तमन्यथा आकाशकालमात्रयोः पृथक्त्वानुपपत्तेरिति। यद्य
पि मंतव्यादयो मनआदिचतुष्टयविषयात्वमपि द्रष्टव्यादिविषया एवं न पृथक्कथ्यमिति मंतव्यादिरूपेण पृथगि
तिष्ठति इत्यादि। सा इतिह स्थले। प्रकाशविचित्रस्त्र्यंतितत्र भूम्यं चर्मतन्मुकाशनिभास्यं चेतदेवेत्यर्थः। पृथिवी
चेत्यादिना विधारयितव्यं चेत्यं तेन आत्मस्वव्याप्तिरुक्तं तदुपाधिभिन्नत्वं सर्वं चोक्तमित्याह। सर्वं हीति। एषु हि इदं
त्यादिनो उपहितस्वरूपमुच्यत इत्याह। अतः परमिति। दृष्टेति। उपाधिकृतमपि दृष्टृत्वादिकमुपाधिव्याप्ति
रिक्तेऽनुपहिते आत्मन्यारोपितं स्फटिके लौहित्यवदस्तीति उपाधिभिन्नोपाधिसाक्षीत्यादिनोक्तः। विज्ञाना
त्मेत्यत्र दृष्टेत्यादाविव कर्तृत्वाच्च कर्तृत्वाभावात् विज्ञानं यज्ञं तनुत इत्यादाविव बुद्धेरमिथ्यानेयो नरूप्यमा
णं क्वाह। विज्ञानमिति। करणभूतमिति। विज्ञानमय इत्यादावित्यर्थः। एषहीति। हि शब्दश्च शब्दार्थकः। स
च सप्रतिष्ठित इति क्रियानुकर्षणार्थ इति वदन् द्रष्टुरात्मनः पृथिव्यादिवेदस्वरूपेणावस्थितेरन्वयोनस

भवतीत्याशंक्य उपाधिलये उपहितस्य पूर्णभावमेवास्य लय इत्याह· स चेति· एवं आयदादीनामन्यधर्मवोक्त्या
त्रोधितत्तुर्यात्मानुवादेन तस्याक्षरे कर्याणिधानं पुरःसरं तज्ज्ञानस्य फलमुच्यत उत्तरवाक्येनेत्याह· तदेकत्वे
ति· वक्ष्यमाणलक्षणमक्षरं प्रतिपद्यत इत्येवंरूपं फलमाहेत्यन्वयः· उत्तरवाक्यमिति शेषः· उक्तमर्थं स्फुटयि
तुमाह· मा हेत्यादि· एतदुच्यत इति· स इत्यस्यार्थमाह· स वेति· अत्राधिकारिणो दुर्लभत्वं स यो ह वा इत्यनेनोक्तं स
यः कश्चिद्देवापूर्व वसद् छायादिविशेषणमक्षरं वेदयत इत्येकं वाक्यं समापनीयं यस्तु वेदयते स सर्वज्ञ इति वा
क्यान्तरं कार्यं अन्यथाय छवदू यान्वयात् आद्यवाक्ये अच्छायादिविशेषणत्रयेण कारणसूक्ष्मस्थूल
शरीरत्रयनिराकरणेन अवस्थात्रयनिराकरणेन अवस्थात्रयराहित्यमनूद्यते लोहितादिगुणवर्जित
मित्यनेन तद्गुणकस्थूलशरीरवर्जितमिति श्रुतीतः· शुभ्रमित्यनेन तमेव तुरीयमनूद्य तस्याक्षरसामाना
धिकरण्येन एकात्म्यमिति विवेकः· अत्राक्षरमित्यनेनाक्षरं पुरुषं वेद सत्यं सर्वो ह्यात्मेत्यं तरो ह्यजः अ
प्राणो ह्यमनाः शुभ्र इति मंत्रोक्तानि सर्वाणि विशेषणान्यात्मोपलक्षणार्थं संगृहीतानीत्याह· सत्यमित्या
दिना· यस्तु सर्वत्यागीति· अत्राधिवाक्ये वेदयत इत्यस्यानुषंगः· अत्र सर्वज्ञ इत्यनेन कस्मिन्नु भगवो वि
ज्ञाते सर्वमिदं विज्ञातं भवतीति श्रुति ज्ञाते सर्वं विज्ञानमुक्तं सर्वात्मत्वस्य ज्ञानजन्यत्वं भवतीत्यत्रं स्यादत ते श्री० १९
आह· पूर्वमिति· एवं चारोपनिवृत्तिद्वारा अभ्यन्तरतज्ज्ञातो विवक्षित इत्याह· सर्वो भवतीति· अन्यादिभि
रिति· ततश्च चक्षुश्च द्रष्टव्यं चेत्यत्रापि चक्षुरादिनिर्देशादुपलक्षितानीति व्याख्यातं॥ ॥इति च
तुर्थः प्रश्नः॥ ॥एवं चतुर्थप्रश्नेनोत्तमाधिकारिणः पदार्थशोधनपूर्वकं वाक्यार्थज्ञानेनाक्षरप्राप्ति
मुक्त्वा मध्यमाधिकारिणां मंदवैराग्यवतां ॐमित्येव ध्यायत आत्मानं प्रणवो धनुरित्यादिमंत्रसूचितं

प२

ब्रह्मलोकप्राप्तिद्वारा क्रमेण स्वरूपप्राप्त्यर्थं ॐकारोपासनं वक्तुं पंचमप्रश्नमवतारयति· अथ हैनमिति·
इदानीमिति· गार्ग्यप्रश्ननिर्णयानंतरमित्यर्थः· परेति· अपरब्रह्मलोकप्राप्तिक्रमेण परब्रह्मलोकप्राप्ति
साधनत्वेनेत्यर्थः· तदद्भुतमिवेति· तदिति क्रियाविशेषणं नोद्भुतमभिध्यानमिति तेनाविशेषेणाद्भुतत्वं
दुष्करत्वं भातीत्यर्थः· अभिध्यानेन तत्पूर्वकालीनप्रत्याहारधारणाख्यं चितेत्याह· बाह्येति· भक्त्या आदरेणादु
भा पचारेण वा· आवेशितः आरोपितो ब्रह्मत्वं यस्मिन्न् ॐकारे तस्मिन्समाहितचित्तः सन्नित्यन्वयः· अनेन धा
रणोक्ता ध्यानशब्दार्थमाह· आत्मेति· संतानो विच्छेदस्तद्रहित· अविच्छिन्नसंतानइत्यर्थः· प्रत्ययांतरेणाविजा
तीयप्रत्ययेनाखिलीकृतः अनंतरितः· चित्तस्य आत्मविषयस्य सतः एकदेशेन विक्षेपं वारयति· भि
जात वातेति· ध्यानेनैव यमादिसाधनमपि सूचितमित्याह· सत्येति· कतममिति· डतमचोर्थं बहुषु निर्धा
रणं दर्शयति· अनेकेहीति· ॐकाराभिध्यानं ध्यानतोत्र दहराद्युपासनवदपरप्राप्तिसाधनमेव·
तत्परप्राप्तिसाधनमपीति प्रष्टुरभिप्रायः· तदभिप्रायज्ञः पिप्पलादः आलंबनतया ध्यानं चेदपरप्राप्ति प
मात्रसाधनं प्रत्यालंबनत्वेन चेत्क्रमेण परप्राप्तिसाधनमित्युत्तरमाह· एतद्वाइति· एतद्ब्रह्मद्वयोर्नपुंस
कयोरोंकारविशेषणत्वायोगाद्ब्रह्मविशेषणमाह· एतद्ब्रह्मेति· किं तद्ब्रह्मेत्यत आह· परं चेति· यदेतत्परं चा
परं च ब्रह्मास्ति तदुनयमोंकार इति वाक्यान्वय इत्यर्थः· न चैवं ब्रह्मोद्देशेन ॐकारत्वविधाने ब्रह्मण्यों
कारदृष्टिः प्रसज्यतेति शंक्यं· ब्रह्मदृष्टिरुत्कर्षादिति न्यायेन लोकेषु सामोपासीतेत्यादाविव निकृ
व ष्टे ॐकार एव ब्रह्मदृष्टिः सिध्यतीति भावः· तयोर्भेदात्कथमेकत्वमित्याशंक्योपचारादित्याह· ॐकारप्र
तीकत्वादिति· अनेन सामानाधिकरण्येन ॐकारस्य प्रतीकत्वमुपदिश्यत इति भावः· ननु किं प्रतीकोपदे

प्र·भा·ना·

शेनसाक्षादेव ब्रह्मानिषिध्यते अत आह· परं हीति· शब्दादिति· शब्दादिभिः साक्षाद्बोधयितुमनर्हमित्यर्थः· आदि
शब्देनानुमानादिग्रह्यते· प्रवृत्तिनिमित्तस्य धर्मस्य जात्यादेस्तस्याभावादिति· तत्र हेतुमाह· सर्वेति· न शक्यमि
ति· अवगाहयितुमित्यन्वयः· तर्हि इन्द्रियैर्मनसा वा तद्ग्राह्यं स्यादित्यत आह· अतीन्द्रियेति· मनसेति· इन्द्रिये
त्यपि द्रष्टव्यं· तर्हि तथाविधस्य ओंकारे प्रवेशासंभवात् किं चिह्नं प्रमाणे प्रवेशो वक्तव्यः अत एव सूर्य इति ता ना
नीति त्वं विशेषं वक्ष्यति ओंकारतादात्म्यं चेतत्कथं निर्विशेषत्वाभेः· अत आह· ओंकारेत्विति· प्रसीदतीति·
तदुपासनेन चित्तस्य नैर्मल्ये सति निर्विशेषं स्वयमेव प्रकाशत इत्यर्थः· तत्र मानमाह· शास्त्रेति· अन्यथा
परब्रह्मार्थं न स्तद्बुद्धिवैयर्थ्यादित्यर्थः· तथा अपरं चेति· प्रसीदतीत्यन्वयः· तस्मादिति· घृतीकृत्यादित्यर्थः· सीद
तस्मादेवं विद्वानिति· ब्रह्मत्वार्हत्या द्रष्टत्वार्हमिति विद्वानित्यर्थः· एतेनैवेत्यनंतरं आयतनेन आलंबने
नेति· पदद्वयं प्रमादतो गलितमिति द्रष्टव्यं तस्य पदस्यापि द्वितार्थमाह· ओंकारेति· ननु एतच्छन्दार्थं कथ
नमेतदिति द्रष्टव्यं अभिध्यानस्यायतनत्वाभावादिति द्रुतरोपासनं वेदस्याप्युपासनं चात्मप्रापकं तं
नसंभवतीत्यत आह· नेदिष्टमिति· मन आद्यपेक्षया इदं नेदिष्ठं समीपवर्ति अंतरंगं श्रेष्ठमालंबनं श्री०
एतदालंबनं श्रेष्ठमेतदालंबनं परमित्यादिश्रुतेरित्यर्थः· नेदिष्टत्वमेवं तत्स्तुवन्नुत्तरवाक्येन साधय १६
ति· स यदिति· विकल्पस्यापि फलं न फलान्नेदिष्टत्वमित्यर्थः· स एकेनेति· एकमात्रादिमात्रत्रयात्मक
च ओंकारः स उपासितव्य इति न जानाति किंतु एकमात्रमुपासितव्यं जानातीत्यर्थः· तथापि एव
दशाज्ञानेव गुणएवतया दुर्गतिं न गच्छतीति किं तर्हि ओंकाराभिध्यानप्रभावात् तदेकदेशध्यानप्रभावाद्बुद्धि
श्चापि वृक्षगतिं गच्छतीत्यन्वयः· तात्पर्यार्थमुक्त्वा इदानीमक्षरार्थमाह· पद्यप्येवमिति· यदि शब्दोय

पद्यपीत्यर्थः व्याख्यातः। एवं च सति तेनैवेत्यतः प्राक् यद्यपीति पदं द्रष्टव्यं। एकमात्रमिति एकमात्रा सकमोंकारम
कारमित्यर्थः। एकमात्राविशिष्टेत्यत्रापि एकमात्रात्वविशिष्टेत्यर्थः। ॐकारेति। तदवयवेत्य
प्र र्थः। एकमात्राधानं प्रधानीभूतमात्राद्वयं यस्मिन्नोंकारमिति केचिद्व्याचक्षते। दीपिकायां वा
चस्पत्येव प्रकारमात्रमित्येवं व्याख्यातं। संबोधित इति तन्मात्राध्यानेन तन्मात्रासाक्षात्कारवा
नित्यर्थः। पृथिव्यां किमभिसंपद्यत इति कर्मकांक्षते। किमिति तं मनुष्यलोकमिति पदमिहाकृष्या
कांक्षां पूरयति। मनुष्यलोकमिति। मनुष्यशरीरमित्यर्थः। पृथिव्यां मनुष्यलोकस्यैव नियमादु
क्तिवैयर्थ्यमत आह। अनेकानीहीति। पश्वादीनीहीत्यर्थः। तर्हि तस्य नियमेन कथं मनुष्यत्वप्राप्तिरत आ
ह। तमृत इति। ऋग्वेदरूपा हीति। पृथिव्याकारः स ऋग्वेद इति श्रुतेरकारस्य तद्रूपत्वमित्यर्थः। अभिध्या
५ ति ता प्रकाररूपा मात्रा ऋग्वेदरूपेत्यन्वयः। तेनेति। येनर्ग्रूपत्वं तस्य तेन मर्त्यो मनुष्यलोकमु
पनयंत इत्यर्थः। वीतश्रद्ध इति। श्रद्धारहितः सन्नित्यर्थः। योगभ्रष्ट इति। एकदेशज्ञानविकल्प इत्य
ता५ र्थः। अनेन नहि कल्याणकृत्कश्चिदिति गीतावाक्यसंवादः सूचितः। द्विमात्रेणेति विशिष्टमिति। द्वितीय
मात्रात्वेन विशिष्टमोंकारं तद्गतमुकारमित्यर्थः। ननु मात्राद्वयमकारस्य पूर्वमेवोक्तत्वात् अत एव द्विती
यमात्रारूपमिति वक्ष्यति। श्रुतौ तृतीया च द्वितीयार्थे ॐकारमभिध्यायीतेत्युपक्रमात् इति भावः। अ
र्थानि ध्यानं स्वादात्म्याभिमानपर्यंतमिति वृत्तं मनसि संपद्यते इति वा कथं तत्र साक्षान्मनः संपत्ते साध त२
नत्वेन वा फलत्वेन वा अनन्वयात् मनःशब्दस्य परिणामस्त्र प्रादिलक्षणं द्वारास्च प्रपञ्जु राद्धो त्म
न

प्र॰भा॰ना॰ १९ एवं व्याख्याने हेतुमाह प्रतीकत्वेनेति॰ अभेदेति॰ प्रतीकत्वे हि अधिष्ठानाध्यस्यमानयोस्तादात्म्यारोपाद्दत्ते दश्रवणमुपपद्यते करणत्वे तु न तदुपपद्यते

त्वेनाकृत्स्नं तरेशक्तोकार एव लक्ष्यत इत्याह॰ स्वज्ञात्मक इति॰ उकारसंयत्तिपर्यं भिनिध्यानं यः करोतीति
वोक्यार्थ इत्यर्थः॰ अथ केचित् सम्पदीत्यादि यः पुनर्मि द्विर्यं तं तन स्तुतिः किंतु उत्कृष्टफलस्य अकारे विश्वाभिन्नत्व विरा
ट् उपासनं उकारे तैजसाभिन्नहिरण्यगर्भोपासनं च विवक्षितमित्याहुः॰ तन्मते मनःशब्देनोड्डपीनामस्य अभि
मानी हिरण्यगर्भ उच्यत इति वक्तुं स्वज्ञात्मक इत्यादि विशेषणमिति बोध्यं॰ दीपिकायां तु मात्राद्वयस्य मिलितस्यो
पासनं मनसि संपीतोऽयमनसा एकाग्रतया चिंतनमिति च व्याख्यातं॰ एवमोंकारस्तत्वा तदुपासनं परब्रह्मविषयं वि
धत्ते॰ यः पुनरिति॰ त्रिमात्रेणेति विशिष्टेनेति॰ विज्ञानविषयीकृतेनेत्यर्थः॰ मात्रात्रयात्मना ज्ञातेनेति यावत्॰ पू
र्ववदत्रापि त्रिमात्रेणेत्यत्र तृतीया मात्रा मकार उच्यत इति भ्रमं वारयितुं ओमित्यनेनैवाक्षरेणेत्युक्तं॰ पूर्वं तत्तन्
मात्राप्रधानमुकार एवोच्यत इति मते इह वेदं विशेषणमनुपपन्नं पूर्वत्रापि ओंकारस्यैवोक्तत्वादिति तन्मतम
नुपपन्नमिव भातीति मात्रेणेति तृतीयाश्रवणात्॰ ओंकारो न प्रतीकं तथा सति विषयत्वेन कर्मत्वात् द्वितीया
स्यात्॰ किंतु अभिध्यायकत्वेन करणत्वमेव तृतीयाबलादिति भ्रमं वारयति॰ प्रतीकेनेति॰ तस्य कर्मत्वेऽपि
कारकत्वेन अभिध्यायीति न क्रियानिर्वर्तकत्वेन हेतुत्वात्तन्मात्रविवक्षया तृतीयोपपद्यत इत्यर्थः॰ अनेकश इति॰ ओं
कारमभिध्यायी स्य यद्येकमात्रामभिध्यायीतीति द्विवारं श्रुतैरित्यर्थः॰ अन्य येत्यस्य स्वबाध्येतेत्यन्वयः॰ अथ यदि द्विमात्रे नेना
नपः पुनरेतं त्रिमात्रेणेति च तृतीया द्विवारं श्रुता हेतुत्वापेक्षया करणत्वं चरमान्त्यकारकविभक्तित्वात्ततस्तस्या श्री॰ १७
अधिबाधो न युक्त इति शंकते॰ यद्यपीति॰ द्वितीयाद्वयस्याधिकमेले स्वारस्यादुपक्रमस्थत्वाच्च तस्यैव प्राबल्य
मित्याह॰ तथापीति॰ प्रक्रमेति॰ प्रक्रमानुरोधादित्यर्थः॰ किंच द्वितीयाद्वयस्य रूढाभेदश्रुतिः एतेनैवायतनेनै
कतरमन्वेतीति आयतनेनेवान्वेतीति आलंबनवाच्यायतनश्रुतिद्वयं चेति षट्कश्रुत्यनुरोधेन तृतीयाद्व

यत्साज्यमित्याह॰ त्यजेदेकमिति॰ तृतीयमात्रारूपीति॰ यद्यपिमात्रात्रयध्यानान्मात्रात्रयरूपित्वमेव तस्य
तथापि तृतीयमात्रायाएवहृत्साकारस्यार्थप्राधान्येन निर्देशः श्रुतिबोध्यं तृतीयमात्रारूपद्वतिसत्त्वे सत्पाठेत
त्स्रूर्यविशेषणं मकारस्यादित्यात्मकत्वादिति॰ हिरण्यगर्भस्य जीवघनत्वमनागतत्वे मनागतता वेक्षणान्या
येनोपपादयति॰ सहिरण्यगर्भ इति॰ लिंगरूपेणेति॰ समष्टिलिंगरूपेणेत्यर्थः॰ तस्मिन्निति॰ समष्टिलिंगा
त्मनि हिरण्यगर्भे व्यष्टिलिंगाभिमानिनः सर्वे जीवा गोत्वसामान्येन खंडमुंडादय इव संहृता इत्यर्थः॰ इदानीं
वाक्यं त्रयोजयति॰ सर्वविद्वानिति॰ सर्वविद्वानि दानीं ध्यायमानः पश्चाद्ब्रह्मलोकं प्राप्तः तत्र ब्रह्मलोके स्था
वरजंगमेभ्यः पराज्जीवघनात्तारं पुरुषं पश्यन्नितस्तोमुक्तो भवतीत्यन्वयः॰ तत्रयः पुनरेतमित्यादिनोक्ते
र्थेष्याद्यमंत्रं योजयति॰ तिस्त्रइति॰ मृत्युगोचरा इति॰ प्रत्येकं ब्रह्मदृष्टिं च विना तदुपासकानां मृत्युं नतिक्रमा
दित्यर्थः॰ ब्रह्मदृष्ट्या संश्लिष्टत्वेन च संप्रयुक्ताच प्रयुक्ताभ्रेन्तायं दोष इत्याह॰ किंचेति॰ जाग्रदिति॰ जाग्रत्सुषु
वैश्वानरस्याभिमानो विश्वः तस्य स्थानं स्थूलशरीरं जागरितं च स्वप्नपुरुषस्तु हिरण्यगर्भाभिन्नस्तैजसस्तस्य स्थानं लिं प्र
लिंगशरीरं स्वप्नश्च सुषुप्तोपि ईश्वरात्मा प्राज्ञस्तस्य स्थानमव्याकृतं सुषुप्तिश्च तेषां मकारादित्तादात्म्येन यदभिध्या
नं तद्बहिरन्तःसु योगक्रियासु युक्तासु अन्योन्यसक्ता अनविप्रयुक्तास्तिस्त्रो मात्रा प्रयुक्ताभ्रेन्न कंपतइत्यन्व
यः अनेनसर्वात्मके परब्रह्मणीश्वरे ॐकाराभेदेन ध्यानमुक्तं॰ यथोक्तेति॰ तिस्रोमात्राइति॰ स्त्रीकोक्तवि भा
गइत्यर्थः कुतो वीतवचनं विद्वेपः स्वस्य सर्वात्मत्वेन स्वव्यतिरिक्ताभावाद्बोधेन ननसंभवतीति कुतो हेतोः कस्मि
न्नपिविषये च त्स्नेहित्यर्थः॰ अरे ब्रह्मप्राप्त्यर्थं यः ॐकारः प्रयुक्तस्तेनैव न च्छुध्यक्ष्प्रयुक्तो [illegible] परमपि प्राप्नोति ब्रु
प

नै

स्तल्लोके उत्पन्ननिर्विशेषब्रह्मसाक्षात्कारेणउक्तस्योंकारस्य क्रममुक्तिफलत्वादित्यर्थः ॥ नैवेति. येनायं परमन्वेति
तेनैव परमन्वेतीत्येवकारार्थ इत्यर्थः. तदोंकारेणेति. अप्यतनीवविशेषणार्थं पुनस्तोंकारग्रहणमिति न पुनरुक्तिरिति
बोध्यं ॥ ॥इति पंचमप्रश्नभाष्यविवरणं समाप्तम् ॥ ॥गताः कलाः पंचदश प्रतिष्ठाः कर्माणि विज्ञानमयश्चेति मंत्रे एक
भिः सह षोडश कलानां परस्मिन् लयमुक्त्वा यथा नद्यः स्यंदमानाः इति मंत्रे दृष्टांतोक्ति द्वारा परप्राप्तिरुक्ता तन्मंत्र ण
योर्विस्तराभिधानार्थं षष्ठं प्रश्नमारभते. अथ हैनमिति. तस्य पूर्वेण संगतिमुक्त्वा ऽर्थानुवादपूर्वकमाह. समस्त
मित्यादिना. अस्य सर्वस्य कारणत्वाद्ब्रह्मण्येपि तस्मिन्नेव लयमाह. सामर्थ्यादिति. लयाधारत्वेन कारणत्वमा
ह. तन्नइति. तदुक्तेः प्रयोजनमाह. जगत इति. यद्यप्यद्वितीयात्मज्ञानान्मुक्तिर्न कारणज्ञानात्तथापि तस्य कारण
त्वे तद्व्यतिरेकेण कार्याभावात् तदद्वितीयत्वज्ञानं सिद्ध्यतीति तादृशात्मज्ञानात् परं श्रेय इति. आत्मा वा इदमेक एवाग्र ना
ते मेव पुरुषं ब्रह्म ततमपश्यत् प्रज्ञानं ब्रह्म एतेन प्रज्ञेनात्मना अस्मत्तः समभवत्तत्सदेवैकमेवाद्वितीयमुप मिस्तु
चौम्य आचार्यवान्वेद अथ संपत्स्ये तमेवैकं जानथ आत्मनस्तस्य षष्ठेऽतुः अहं ब्रह्मास्मीति तस्मात्तत्सर्वमभ
वदित्यादिषु श्रुतिषु निश्चितमित्यर्थः. इत्यपि तादृशात्मज्ञानस्यैव सर्वात्मभावः श्रेय उक्तं स्यात्. अनंत
रमिति. वक्ष्यमाणं ग्रंथं वर्त्तिष्यमाणमाह. वक्तव्यमिति. तदर्थीयमिति. तस्य शरीरांतस्थत्वोक्ति द्वारा तस्य प्रत्यगात्मत्वं श्री०
ज्ञानार्थमित्यर्थः. अज्ञानेकारणमिति. अज्ञानसंभावनायां कारणमित्यर्थः. अप्रत्ययमिति. अविश्वासमित्य प १८
र्थः. अन्यथासंतमिति. ज्ञानिनं संतं अन्यथा कुर्वन् अज्ञानिनं कुर्वन् आरोपयन्नित्यर्थः. कथं तेनावद्यमित्यने
न सूचितमर्थमाह. अनृतइति. समूलो वा इत्यनेन सूचितमाह. अन्तं चेति. स्वरूपेणाप्यलाभावादाह. विद्वे

. प्रश्नमिति। प्रष्टव्यमित्यर्थः २

दि त

यत्वेनेति॰ यावद्विज्ञासितं न ज्ञायते तावदहं दि घाऽन्यवद्भासत इति शं न्यमिवेत्युक्ते पुरुषस्य षोडशकलत्वेन सा
स्याम्नायवत्वेन किं तु कलाजनकत्वेन तदुपाधिमत्वादिति वक्तुं यस्मिन्नेता इति॰ वाक्यमिति तत्तात्पर्यमाह॰
षोडशकलाभीरिति॰ ननु केवलस्यात्मनोऽदर्शनात् किं वक्ष्यमाणकलो इत्यत आह॰ तदुपाधीति॰ तथैव स
प्रदर्शनीय इत्यत्र हेतुमाह॰ अत्यंतेति॰ अविद्याविषय इति॰ अविद्याधीना इत्यर्थः॰ कालत्रयेऽपि तास्वां चैतन्य
रूपाधिष्ठानाव्यतिरेकाद्रज्जुसर्पवन्नेष्टा तासामित्यविद्याविषयत्वस्योपपत्तिः॰ चैतन्येति॰ चैतन्याव्यतिरे
केण लक्ष्यमाणत्वं हेतुं विज्ञानवादीभ्रांत्या दृढीकरोति॰ अत एवेति॰ छ॰ तं यथा अग्निसंयोगाद्द्रवावस्था
प्रतिपद्यते॰ एवमहमाकारमात्मीविज्ञानमेव वासनावशाद्द्विधाकारेण जायत इति वदतां तेषां भ्रमोविषय
प स्य चैतन्याव्यतिरेके प्रत्ययं गमयति॰ अन्यथा तथा भ्रमानुपपत्तेरित्यर्थः॰ विषयाणां चैतन्याव्यतिरेकेणाप्र
तीति नियमादेव विषयविज्ञानरूपेण चैतन्याभावेसुषुप्त्या दोषस्य भ्रमो ज्ञातः॰ केषांचिदिति॰ तदीयप्रां
स्यापि चैतन्याव्यतिरेकप्रतीतिं दृढीकरोति॰ तन्निरोध इति॰ चैतन्यस्यानित्यस्य कल्पारोपाधिष्ठानत्वेन संभ
वति॰ कर्त्ता कार्यत्वादिति नैयायिकपक्षोप्या जैन शंकते॰ घटादीति॰ भूतधर्म इति॰ देहाकारेण संहतभूतधर्म
क्षि इत्यर्थः॰ चैतन्यस्यारोपाधिष्ठानत्वसिध्यर्थं नित्यत्वमेकत्वं च वदन्नेतान्निराकरोति॰ अनपायीति॰ प्रत्यव
भासत इति॰ नानात्विन चेति शेषः॰ सत्यं ज्ञानमिति तथा च श्रुतिविरोधादारोपस्याहेयाद इत्यर्थः॰ किंच ज्ञानका
त्वेनकार्य ले विषयाणां सद्भावनियमाभावात्॰ विषयकाले ज्ञानस्य सत्त्वानियमात्तयोर्भेद इति विज्ञानवादिपक्षं नि
राकुर्वन्नव्यभिचारादेव ज्ञानस्य नित्यत्वं साधयन्नैयायिकादिपक्षमपि निराकरोति॰ स्वरूपेणेति घट

ज्ञानकाले घटाभावसंभवात् विषयाणां ज्ञानव्यभिचारित्वं ज्ञानस्य तु विषयकाले अवश्यंभावनियमादव्यभि
चारित्वमित्यर्थः॰ पटकालेघटज्ञानमपि नास्तीति घटज्ञानस्यापि पटविषयव्यभिचारित्वं तुल्यमित्याशंक्य स्व
श्री रूपेत्युक्तं तेनास्य विषयविशिष्टत्वरूपेण व्यभिचारः॰ विषयस्य तु स्वरूपेण वेति विशेषइत्यर्थः॰ ज्ञानस्याव्यभि
चारित्वमुपपादयति॰ यथायथेति॰ ननु उत्पन्नविनष्टादेर्भूतभविष्यत्वर्तिनश्चाज्ञायमानत्वात् ज्ञानस्यापि ज्ञेया
स व्यभिचारासिद्धइत्याशंक्य तस्या ज्ञानेतैज्ञातासिद्धेस्तथाभूतपदार्थोऽसिद्धइत्याह॰ वस्तुचेति॰ अनुपपत्तिमेवद
र्शयन्नेनस्पष्टीकरोति॰ रूपंचेति॰ ज्ञेयस्य ज्ञानव्यभिचारित्वं ज्ञानकाले सत्वनियमाभावरूपं स्पष्टमित्याह॰ व्यभि
चरत्विति॰ घटज्ञानकालेकदाचित्घटाभावादित्यर्थः॰ पटकालेज्ञानस्यापि व्यभिचारस्तुल्यइत्याशंक्य वि घट
शिष्टरूपेण व्यभिचारेपि स्वरूपेण व्यभिचारं पूर्वसूचितमाह॰ नव्यभिचरतीति॰ ज्ञानमित्यस्य इत्यनु
षंगः॰ पूर्ववाक्ये द्वितीयांतं इह तु प्रथमांतमिति विशेषः॰ भावादिति॰ स्वरूपेणेत्यर्थः॰ ज्ञानस्य स्वरूपेण सत्तामेव
र ज्ञेयांतस्य ज्ञेयत्वादेव साधयति॰ नहीति॰ स्वरूपेणाप्यभावं शंकते॰ सुषुप्तइति॰ किंतदानीं ज्ञेयाभावेन ज्ञा
नाभावः साध्यते उत ज्ञानस्यादर्शनाद्वा आद्ये विज्ञेयस्य व्यंग्यत्वात्तदभावाद्व्यंजकाभावइति नाद्यः व्यभि श्री॰
चारादित्याह॰ नज्ञेयेति॰ व्यंग्यज्ञाने कल्प्यस्य व्यंग्याभावे अभावउच्यते आलोकस्य प्रत्यक्षसिद्धत्वा १९
त्तेवमितिज्ञानानुमेयत्वर्वादिनं प्रतिदृष्टांतांतरमाह॰ नहीति॰ वैनाशिकमतेपि ज्ञानव्यतिरिक्ता लो
काद्यभावान्नतत्रव्यभिचारइति शंकते॰ वैनाशिकइति॰ कल्प्ययत्येवेति॰ उक्तव्यभिचारस्थलाभावेनव्यभि
चाराभावादित्यर्थः॰ एवमपि ज्ञानाभावकल्पकस्य ज्ञेयाभावस्य ज्ञानमंगीक्रियते न वा आद्ये नज्ञानाभा

वाउततयोरैक्यादेकाप्राप्तेरितराभावइतिप

वसिद्धिः॰ तस्यैव अभावज्ञानस्य सत्वादित्याह॰ येनेति॰ येन ज्ञेयाभावज्ञानेन तदभावज्ञानाभावं कल्प्येत त
स्य ज्ञानस्याभावः केन कल्प्येत तेन केनापि कल्पयितुं अशक्यमित्यर्थः॰ नद्वितीयमित्याह॰ तदभावस्यापीति॰
ज्ञेयाभावस्यापि अज्ञातस्य ज्ञानाभावकल्पकत्वासंभवाद् अवश्यं ज्ञेयत्वात्तत्ज्ञानाभावे तदनुपपत्तेः॰ कल्पना
नुपपत्तेर्ज्ञानानंगीकारपक्षेन युक्त इत्यर्थः॰ आद्यकोटौ द्वितीयकल्पं शंकते॰ ज्ञेयेति॰ वैनाशिकमते पि अ
भावस्य ज्ञेयत्वाभ्युपगमात् बुद्धिबोध्यं त्रयादन्यत्संस्कृतं क्षणिकं च तदिति प्रतिसंख्याऽप्रतिसंख्यानिरोधाकाश
रूप व्यतिरिक्तस्यैव क्षणिकत्वे [illegible] न निरोधशब्दितस्याभावस्य [illegible] नित्यत्वांगीकारेण तदभिन्नस्य ज्ञान
स्यापि सुषुप्ते सत्वं नित्यत्वं च प्राप्तमित्याह॰ नाभावस्येति॰ ज्ञानस्याभावाभिन्नत्वेन अभावत्वमेव स्यान्न तु भाव
त्वेन सत्वं नित्यत्वं च स्यादित्याशंक्य अभावस्यापि ज्ञानाभिन्नत्वेन अभावत्वमेव न स्यादित्याह॰ तदभावस्येति॰
अनित्यत्वं च ज्ञानस्येति॰ वाङ्मात्रमेव स्यादित्यनुषंगः॰ वाङ्मात्रेणापि अभावस्याऽभावत्वेन ज्ञानानित्यत्वेन
च अस्मत्सिद्धांतसिद्धिरित्याशंक्य नाममात्रेण तेन वास्तवनित्यत्वादिविरोधाभावान्नास्माकं क्षतिरित्याह॰
न चेति॰ अभावनामेति॰ अनित्यत्वनामेत्यपि द्रष्टव्यं॰ एतद्दोषपरिहारार्थं ज्ञेयस्यापि सतो भावस्य ज्ञाना
भेदो नांगीक्रियत इति शंकते॰ अथेति॰ तर्हि ज्ञेयाभिन्नत्वेन हेतुना सुषुप्ते ज्ञानाभावो न सिद्ध्यति यद्यद्भावेन
तज्ज्ञानाभावसिद्धावपि अभावज्ञानाभावासिद्धेस्तस्याभिन्नत्वाभावादित्याह॰ नतदेति॰ यद्वा अभावस्य ज्ञेयस्य
ज्ञानाद्भेदे भावस्यापि तथात्वं स्यात् विशेषहेत्वभावात् तथा च न ज्ञेयाभावात् ज्ञानाभावसिद्धिरित्याह॰ नतर्हीति॰
ननु ज्ञेयस्य ज्ञानव्यतिरिक्तमंगीक्रियते तथा च अभावस्य ज्ञानव्यतिरिक्तत्वादभावत्वादिकं सिध्यति ज्ञान

त्व

स्य तु न ज्ञेयव्यतिरिक्तत्वं॰ तथा च ज्ञेयाभावे ज्ञानाभावसिद्धिरिति निरुद्धगतिकः शंकते॰ ज्ञेयमिति॰ ज्ञानस्य
ज्ञेयाव्यतिरेके ज्ञेयस्यापि तदव्यतिरेकोवश्यंभावात् अन्यथा उभयोरत्यंतभेद एव स्यात् भेदाभेदयोर्विरोधादनु द
त्या पपत्तेरिति दूषयति॰ न शब्दमात्रादिति॰ इदमुपलक्षणं ज्ञानस्याभावाव्यतिरेके अनित्यत्वादिकं च स्यादेवेत्य
पि द्रष्टव्यं यद्वो तद्दोषपरिहाराय तस्यापि भेद एवांगीक्रियतेत्ततोर्द्रं सुषुप्तो ज्ञानाभावसिद्धिरित्युपसंहरति॰ ज्ञेय न
व्यतिरेकेपीति॰ सुषुप्ते ज्ञानस्यादर्शनादेव अभाव इत्याद्यद्वितीयं शंकते॰ ज्ञेयाभाव इति॰ आलयविज्ञान
त संतेर्नित्यत्वांगीकारेण त्वया तदापि तदभावो वक्तुं न शक्य इत्यादि॰ न सुषुप्त इति॰ अस्तित्वमिति॰ तथा च ज्ञा
नस्यादर्शनमसिद्धं सुषुप्तेपि तदंगीकारादित्यर्थः॰ ननु ज्ञेयाभावेन तन्निरूपकस्य ज्ञानस्यादर्शनमित्युच्य
ते मया सुषुप्ते च स्वस्यैव स्वज्ञेयत्वात् ज्ञानदर्शनमुपपद्यते अस्मन्मते त्वन्मते तु स्वज्ञेयत्वानंगीकारात्सुषुप्ते चा
न्यस्याभावान्निरूपकाभावात् ज्ञानदर्शनाक्तिवमुपपद्यत इति शंकते॰ तत्रापीति॰ अभावस्य ज्ञानज्ञेययो
र्भेदस्य साधितत्वात्तद्दृष्टांतेन सर्वत्र ज्ञानज्ञेययोर्भेदसाधनात् स्वज्ञेयत्वं ज्ञानस्येत्यादि॰ न भेदस्येति॰ अभा
वरूपो ज्ञेयो विषयो यस्य तस्य ज्ञानस्य अभावरूपो ज्ञेयस्तद्व्यतिरेकादित्यर्थः॰ अभावस्य ले भेदेपि न सर्व श्री॰
त्रेत्याशंक्य न्यायस्य तुल्यत्वान्न तदन्यथा कर्तुं शक्यमित्याह॰ नहीति॰ ज्ञानस्यैव्यतिरिक्तज्ञेयत्वनियमप स्व २०
स्व क्षेप्रन वस्थावेनाशिकः शंकते॰ ज्ञानस्येति॰ ज्ञेयस्यैव्यतिरिक्तज्ञेयत्वनियमांगीकारात् अस्मन्मते च ज्ञान
स्य ज्ञेयत्वानंगीकारान्न दोष इत्याह॰ नत्वदिति॰ सर्वस्य वस्तुजातस्य विभागोऽसंकरः ज्ञानं ज्ञानमेव न ज्ञेयं
ज्ञेयमपि ज्ञेयमेव न कदाचिदपि ज्ञानमित्यैरूपस्त्वस्यापपत्तेरित्यर्थः॰ अथ बाह्याभावोपपत्तेरिति छेदः॰
व त

ज्ञानज्ञेयरूपभागद्वयमेव राशीद्वयमेवांगीक्रियते न तु तृतीयो ज्ञानविषयकज्ञानरूपो भावराशिरंगीक्रि
यत इत्यर्थः॰ तामेवाह॰ यदाहीति॰ यस्मिन्पक्षे ज्ञेयं सर्वं स्वव्यतिरिक्तस्य कस्यचिद्ज्ञानस्य ज्ञेयमित्यंगीक्रि
यत इति ज्ञेयपदावृत्त्यो व्यतिरिक्तस्येतिपदाध्याहारेण च यदाहीतिवाक्यं योज्यं अयं वैनाशिकैरिति छेदः॰
प ताद्विय इति॰ ज्ञानज्ञानविषयकज्ञानात्मक इत्यर्थः॰ तर्हि तत्पक्षे ज्ञानात्मकस्य बुद्धस्य सर्वज्ञत्वं न स्यात्स्वे
न स्वस्याज्ञानादिति शंकते॰ ज्ञानस्येति॰ ज्ञातुं योग्यस्य सर्वस्याज्ञाने हि सर्वज्ञत्वहानिः॰ अन्यथाशब्दविषा श्री
णादेरज्ञानात्सर्वज्ञत्वं कस्यापि मतेन स्यात्॰ अतो नास्मन्मते तस्य दोषस्य प्राप्तिः किं तु वैनाशिकस्यैवतेन
ज्ञानस्यावश्यं ज्ञेयत्वांगीकारात्स्वेन स्वस्य ज्ञेयत्वस्य सिद्धं हीति पूर्वग्रंथे दूषितत्वादन्यज्ञेयत्वस्य चानंगी
कारात्सर्वज्ञत्वायोगादित्याह॰ सोपीति॰ तर्हि तव मते कथं सर्वज्ञत्वनिर्वाह इत्याशंक्यास्मन्मते तस्य मायिकत्वे
न तदनिर्वाहेपि न दोष इत्याह॰ किं तदिति॰ वस्तुतस्तु सर्वस्य व्यवहारहेतुज्ञानवत्वं सर्वज्ञत्वं न तु ज्ञानस्याधिस्व
प्रकाशत्वेन स्वव्यवहारहेतुत्वादाद्यस्य ज्ञातुं योग्यसर्वज्ञानाद्वा तदस्तीति भावः॰ पूर्वोक्तानवस्थादोषोपि तस्यैवेत्याह॰
अनवस्थेति॰ ननु तेन स्वेनैव ज्ञेयत्वांगीकारात् नानवस्थेत्यत आह॰ स्वात्मना चेति॰ सिद्धं हीत्यत्र स्वज्ञेयत्वा
न्य संभवस्योक्तत्वात्परिशेषाद्ज्ञेयत्वे तस्य तस्याप्येवमित्यनवस्थानिवार्येत्यर्थः॰ ज्ञानस्याज्ञेयत्वे तद्व्यवहारासि
द्धिः ज्ञानांतरज्ञेयत्वे चानवस्थातद्वापि स्यादिति शंकते॰ समान एवेति॰ स्वप्रकाशत्वेन स्वव्यवहारसिद्धेर्ज्ञानभे
दस्यैवास्माभिरंगीकारादनवस्थायाः प्रसक्तिरेव नास्तीति परिहरति ज्ञानस्येति॰ एकैकपक्षे भेदप्रतीतिमुपपादय त
ति॰ नामरूपेति॰ एवं च चैतन्यस्यैकत्वेन नित्यत्वाज्जगद्भिन्नत्वेन तस्य सत्यत्वाच्चाधिष्ठानत्वोपपत्तेः॰ तस्मिन्के

प्र.भा.ना.

ल्ना नामध्यारोप आत्मप्रतिपत्त्यर्थमिहोच्यत इत्याह । तथा चेति । चैतन्यस्य नित्यत्वेनाधिष्ठानत्वे सति इदमृतोडु
दंकल्पनानामध्यारोपणमुच्यत इत्यर्थः । ननु चैतन्यस्य न नित्यत्वं परिच्छेदकत्वेनः परिच्छिन्नस्य च घटादिवदनित्यत्वा
दिति शंकते । नन्विति । शरीरांतस्थत्वं प्रत्यक्षस्यैव विवक्ष्योच्यते न परिच्छेदविवक्षया तथा सति उत्तरवाक्यविरोधा
दित्याह । नेति । अयोग्यत्वादपि सोऽर्थो न विवक्षित इत्याह । कल्पेति । स्वोत्पत्तेः पूर्वं स्वस्याभावात्तत्कालीनपुरुषं परिच्छे
त्तुं न शक्नोतीत्यर्थः । बीजकार्यस्य वृक्षस्य कार्यं फलं स्वकारणवृक्षकारणं बीजरूपमभ्यंतरीकरोतीति दृष्टमिति नासंभा ति
व्यत्वमिति शंकते । बीजवदिति । तद्विवृणोति । यथेति । दृष्टांते बीजव्यक्तिभेदाद्विरोधोऽपि इह तु पुरुषव्यक्तेरेकत्वात्कार
णत्वाभ्यंतरीभावयोर्विरोध इत्याह । नेति । ननु कारणीभूतबीजस्यैव वृक्षफलत्वं तदंतर्गतबीजरूपेण परिणाम
तयोः कारणकार्यबीजयोरैक्यमाशंक्य एवमपि तस्य सावयवत्वात्स्वचतुष्फलाकारेण परिणतावयवेभ्यो भि
न्नावयवानामेव तदंतर्गतबीजरूपेण परिणामात्तयोर्भेदेनाधाराधेयभावस्यादृष्टत्वात् इह तु निरवयवत्वान्न
तथात्वमित्याह । सावयवत्वाच्चेति । आद्यहेतुं विवृणोति । दृष्टांत इति । श्रूयत इति । यस्मिन्नेताः षोडश कला इति
यच्छब्दोक्तस्यैव पुरुषस्यांतःशरीरे सोम्य स पुरुष इति तच्छब्देनाभिधानादित्यर्थः । द्वितीयहेतुं विवृणोति । बीजे
ति । निरवयवश्चेति । तथा च एकदेशेन फलादिरूपेण परिणमय एकदेशेन तत्रावस्थानं बीजवन्न संभवतीत्यर्थः । श्री०
किं च कलानां सावयवत्वेन परिच्छेदात् पुरुषस्य तद्बहिः परिसरत्वात् परिच्छिन्नस्य न परिच्छिन्नाधारकत्वं संभवतीत्याह । २३
सावयवाश्चेति । यद्वा सावयवत्वेन कार्यत्वात् भवाभावान्निरवयवत्वात् परमार्थसत्पुरुषाधारत्वं नोपपद्यत इत्याह । सा
वयवाश्चेति । नन्वाकाशकार्ये शरीरे आकाशस्यापरिच्छिन्नस्याभ्यंतरीभावो दृष्ट इत्याशंक्य तस्यापि शरीरा

कारणावस्थानमेव छिद्रादिविशिष्टस्यैव शरीरत्वान्नतु तदंतस्थत्वमित्याह॰ एतेनेति॰ युक्त्या सह मयि वचनं प्रामा-
ण्यादंगीकार्यमिति शंकते॰ किं हस्तेनेति॰ वचनस्यापि वक्तृनोऽन्यथाकरणे सामर्थ्याभावाद्वस्तुस्वरूपाविरोधेने
व बोधकत्वादन्यथा विचारवैयर्थ्यापत्तेरूहार्थेन बोधाद् इत्याह॰ वचनस्येति॰ तर्हि अप्रत्तः शरीर इति शंकते॰॰ क
थमुपपन्नोरित्याशंक्य पुरुषस्य शरीरोपादानत्वेन तदनुरूपतास्य तदंतर्गतत्वप्रतीतेस्तदभिप्राये यं श्रुतिरिति
सदृष्टांतमाह॰ तस्मादिति॰ अंडेति॰ अंडकारणस्य व्योम्नोऽयथै तदनुरूपत्वेन तदंतर्गतत्वप्रतीतिस्तद्वदित्यर्थः॰
यद्वा लोकप्रमसिद्ध परिच्छिन्नत्वमनूद्य तेष्वप्रत्येत्याह॰ उपलभ्येति॰ तत्राभिव्यक्तेर्वा तदंतर्गतत्वव्यपदेश इ
त्याह॰ उपलभ्यते चेति॰ ननु यस्मिन्नेतावो डशाकलाः प्रभवंतीति अनेनाध्यारोपस्योक्त[illegible]योत्सर्ग इ स्यो भित्यादिना
पुनः सृष्टिकथनमधिकमित्यत आह॰ यस्मिन्निति॰ अत इति॰ क्रमप्रतिपत्त्यर्थं सर्ग इत्याभित्याद्युच्यत इत्यर्थः॰ तत्प्रतिपत्तिप्रक
लोसक्ति प्र तिपत्तिसौकर्यार्थं विपर्ययेणानुक्रमोऽनुपपद्यते चेति न्यायेन कार्यस्य स्वस्वकारणक्रमेणापवादसौकर्यार्थं चे
त्यर्थः॰ इक्षणेऽर्थः प्रयोजनमाह॰ चेतनेति॰ स हीति॰ सृष्टिः प्राणादेः सृष्टिस्तस्याउक्तौ त्यादिफलं क्रमः प्राणब्रु
द्धेमित्याद्युक्तानंतर्यमादिशब्देन लोकेषु नाम चेत्याधाराधेयविशेषो गृह्यते॰ ननु इक्षणेऽस्याने चेतनपूर्वकत्व
सिद्धिः न्यायेनचेतनस्याकर्तृत्वेनाऽहेतुत्वे प्रचेतनस्य प्रधानादेर्विक्रियावत्वेन हेतुत्वे च सति ईक्षणस्यान्य
थानेतव्यादिति सांख्याः शंकते॰ नन्वात्मेति॰ प्रकरणेत्यस्य तत्रेदमित्यनेनान्वयः॰ आत्मा अकर्ता तन्नु तथा
त्वमिदं कर्तृत्व वचनमनुपपन्नमित्यर्थः॰ किंच॰ तस्य कर्तृत्वांगीकारेऽपि कर्तुः कुलालादेरिव सहकारिसा
धनांतराभावादात्मनोऽद्वितीयस्य नघटेत् तु प्राणादि संसारकर्तृत्वानुपपत्तेः स्यानुपपन्नं सृष्टित्ववचनमित्याह॰

आत्मनोऽपीति · कर्तृत्वेऽपीत्यपिशब्दान्वयः कर्तर्हि किं कर्तृत्वे अत आह · प्रधानमिति · कर्त्रीति क्रियाशक्तिमत्त्वम अ
तः प्रवर्तत इत्यन्वयः · ...स्याचेतनस्य प्रवृत्त्यनुपपत्तिरत आह · पुरुषार्थमिति ·
पुरुषस्य चेतनस्य भोगापवर्गरूपमर्थं प्रयोजनमुद्दिश्य [illegible] ननु प्रधानस्याचेतनस्य प्रयोजनापे
क्षाभावात्प्रवृत्त्यनुपपत्तिरत आह · पुरुषार्थमिति · पुरुषचेतनस्य भोगापवर्गरूपमर्थं प्रयोजनमुद्दिश्य प्रवर्तने
वत्सविवृद्ध्यर्थमचेतनस्य धेनुदेहगतक्षीरस्य सस्यादिविवृद्ध्यर्थं चाम्बुनश्चाचेतनस्य प्रवृत्तिदर्शनादित्यर्थः · ननु प्र
धानस्याप्येकत्वे न सह कार्याभावात्कारणत्वानुपपत्तौ अगत्याचेतनस्यैव कथंचित्कर्तृत्वं वाच्यमित्यत आह · सत्त्वादि
ति · सत्त्वादिगुणत्रयस्य साम्यावस्था प्रधानमिति सांख्यमतं तत्र सत्त्वादिगुणैरनेकात्मके प्रधाने कारणे सति पु
रुषस्य कर्तृत्ववचनमगतेरभावादनुपपन्नमित्यन्वयः · यदि चेतनानधिष्ठितस्याचेतनस्य प्रवृत्तिर्न दृष्टेति
मन्यसे तर्हि परमाणुकारणवादोऽस्तु तत्रेश्वरस्याधिष्ठातृत्वसत्त्वादित्याह · ईश्वरे त्विति · अत्रापि सक्रियत्वस्यानुप
पन्नमिति पूर्वेणान्वयः · तर्हि दुःखलेशश्रवणस्य का गतिरत आह · तस्मादिति · पुरुषार्थेनेति · पुरुषस्य भोगापवर्गार्थेनेत्य
गुणेन र्थः · मुख्ये इत्यत्र तृतीयाविद्यमानेऽनियतक्रमेणाप्रवर्तमानत्वे नैयोगाद्देहसेति गौणः प्रयोगः माणवके पैङ्गल्यगुणयोगे
न अग्निशब्दप्रयोगवदित्यर्थः · नन्वेवमपि इत्यत्र प्रधाने पुरुषशब्दः कथमत आह · यथा राज्ञ इति · तद्वदिति · पुरुषस्य भो श्री
गापवर्गकारित्वात्प्रधाने पुरुषशब्दः आरोपचारिक इत्यर्थः · स्वतोऽकर्तुरप्यात्मनः मायोपाधिकं कर्तृत्वं संभवती २२
ति हृदि निधाय प्रथममापाततः प्रतिबन्द्या परिहरति · नेति · बुद्धिः कर्त्री भोक्ता पुरुष इति वदद्भिः सांख्यैरात्मनो
भोक्तृत्वमुक्तमित्यर्थः · श्रुतिप्रामाण्यादिति · श्रुत्युक्तं जगत्कर्तृत्वमविकारिणोऽपि कथंचिन्निर्वाह्यमित्यर्थः · सा

स्व्यः प्रतिबंदि शंकते॰ तत्वांतरेति॰ भोगो नाम सुखदुःखानुभवः स च पुरुषस्य स्वरूपभूत इति तस्य तत्वांतरापत्तिलक्षणप न
रिणाम इत्यर्थः॰ परिणामो हि पूर्वरूपपरित्यागेन रूपांतरापत्तिः सा च स्फटिकस्येव रूपांतरापत्तौ विजातीयरूपांत
तरापत्तौ वा अग्नितप्तत्वादिकमावेदद्वेवेति भोक्तृत्वाविवेकोपाधिकं भोक्तृत्वमंगीकर्तव्यं तेन तदात्मकं कर्तृत्वमपि तत्स्व
मभिन्नेत्यमुख्यपरिहारमाह॰ नेति॰ एकस्य वस्तुनोऽसहायस्याकर्तुरात्मनः कामस्यापीत्यपेरर्थः॰ उपाधिकृते कर्तृत्वसं
भवादविद्यारूपसहायस्य संभवाद्वा त्यात्स्वस्मादिनूतलीवा नाम नामका मानोसंभवात्तत्स्वरूपार्थं स्वं दृष्टं तेन छाविध
स्या एवुपपद्यत इति ना चेतनस्य चेतनानधिष्ठितस्य तद्युक्तमिति भावः॰ नामरूपेति॰ अनभिव्यक्तनामरूपेत्यर्थः॰ बंध ६६
मोक्षादीत्यादि शब्देन तत्साधनमुच्यते मोक्षस्यापि प्रतियोगित्वेन सोपाधिकत्वमुक्तं परमार्थस्याप्रकृत्यैकगम्यत्वमाह॰
बंध सर्वेति॰ एवं भूतस्यात्मनो न स्वदृष्टं च मिथ्याह॰ न तत्रेति॰ कल्पयितेति॰ कल्पयितृत्वप्रवक्तृत्वाद्इत्यर्थः॰ पुरुषस्य निर्वि
शेषत्वेन तस्मिन्वस्तुतः कर्तृत्वयोगात्तदारोपितं मेवेति कल्पयितुं प्रवक्तात्राप्यपि सर्वविरोधनिरासकागमप्रमाणैक
त्वी शरणत्वात् भावप्रत्ययसारादिविरोधापत्त्याऽप्यारोपितत्वांगीकारोऽत्र स तत्वतः सर्वं परमार्थतः एवे इति तत्रापि प्र
चेतनस्य भोक्तृत्वायोगात्तन्माया मात्मनोऽंगीकुर्वंति कर्तृत्वादिकं तु प्रधानस्यांगीकुर्वंतीत्यर्थः॰ तर्हि तस्य
को दोष इत्याशंक्य भोक्तृत्वांगीकारे तत्थैव तस्यैव कर्तृत्वमपि स्यादित्यन्यैः शिक्षिताः संतः स्वमतान्निच्यवंते
इत्याह॰ अन्येति॰ कुतार्किकाः शिक्षितायाः बुद्धेः विषयाः प्रधीनानि शिक्षितबुद्धय इत्यर्थः॰ तर्हि सांख्यधिषणकस्य
स्य तार्किकैर्मतं ग्राह्यमत आह॰ मयेति॰ तस्यापि सांख्येन शिक्षितत्वान्न तदपि ग्राह्यमित्यर्थः॰ तर्हि कस्य तार्किकस्य
मतं ग्राह्यमित्याशंक्य न कस्यापीत्याह॰ इत्येवमिति॰ तर्हि तथा तार्किकमतं किमर्थं दूष्यते परस्परमेव ते दूषितत्वाद्

प्र.भा.ना.

नवतद्देवद्व्यादिमत्त्वप्रसंगश्चेत्यत आह । अत इति । विरोधोद्भवकारणमिति । पारमार्थिकत्वस्य भेददर्शनमित्यर्थः । सं
राध्नोतीति । भेददर्शनस्यापरस्य शोल दोषग्रस्तत्वादद्वैतान्निर्दुष्टमिति निश्चितबुद्धिः सन्निवर्तितसर्वविकल्पेभ्यः उपशान्तो
भवतीत्यर्थः । दोषदर्शनं किंचिद्रूपयतइति यदुक्तं तदेव प्रपंचयन्नर्थं यदि सारोपितत्वमेव परेणाभिवक्तव्यमित्याह ।
किं चेत्यादिना । तत्रादौ भोक्तृत्वकर्तृत्वयोर्विशेषस्य वक्तुमशक्यत्वात्तयोराश्रयव्यवस्थानं संभवतीत्याह । भोक्तृते
ति । आध्यायमीवद्वान्शं वैस्रोतोक्तं विशेषं शंकते । नन्विति । स्वामस्योर्विक्रियतइति । चिद्रूपेणावेक्षीयतइत्यर्थः । तर्हि तो
का रेति । अनेकवाऽसुखादिषु रूपविलक्षणमहदादिरूपेणेत्यर्थः । पुरुषस्यापि चिद्रूपेणैव परिणामान्तररूपान्तरापत्ते
असुखादिकं वा प्रधानस्य तु आकारान्तरेण परिणामात्त्वैरूप्यापादसुखादिकं स्यादित्यर्थः । किं चिद्रूपेणापरिण
मआगंतुकोवाबोवा आद्यं आगंतुकविशेषवत्त्वेन अनित्यत्वापत्त्या प्रधानादविशेषः ॥ भोगानन्तरं सुनः स्व
त्तो रूपावस्थानान्नानित्यत्वादिदोषश्चेत्प्रधानस्यापि प्रलये तथात्वांगीकारान्न तयोर्विशेषः स्यादिति दूषयति । नास्मा
विति । संग्रहवाक्यं विवृणोति । प्राभिति । अस्यां कल्पनायामिति । चिद्रूपेण तत्त्वान्तररूपेण विक्रियाकल्पनायामपि
विचार्यमाणे भ्रष्टतान कश्चिदपि विशेषो लभ्यतइति तयोर्विभागो विक्रियेति तथाऽऽत्मात्रेणैव कल्प्यतेउच्यत श्री० २३
इत्यर्थः । द्वितीयं शंकते । अथेति । चिन्मात्रएवेति नत्वागंतुकं रूपान्तरमित्यर्थः । नहि कर्मजन्यः कादाचित्को भो
गनसिद्ध्येदित्याह । नतहीति । एतत्तद्दोषपरिहाराय आगंतुकं परिणाममभ्युपेत्य भोगकालीनविक्रियावत्त्वं
भोगः स च पुरुषस्यैव न प्रधानस्येति भोगसदसत्त्वाविशेषमात्रेण शंकते । भोगकालीनेति । तत्रापि किं भोगकालीने
विक्रियामात्रं भोगः उत तत्कालीनचिन्मात्रगतविक्रियाभोगइतिविकल्प्याद्यं भोगकाले प्रधानस्यापि सुखा
पि

द्याकारेण विक्रियावत्त्वाद्भोगः स्यादित्याह नेति· द्वितीयं शंकते· चिन्मात्रस्यैवेति· चिन्मात्रस्यैव विक्रियेत्येवकारेण धर्म्यं
तरगत विक्रियानपेक्षा चैतन्यविक्रिया भोग इत्युच्यते वा· चैतन्यमात्रगतासाधारणविक्रिया भोग इति वा नाद्यः सु
खादिरूपप्रधानविक्रियां विना भोगासिद्धेः· न द्वितीयः· चैतन्यासाधारणविक्रियैव भोग इत्यत्र हेत्वभावात्स्वासाधा
रणविक्रिया भोग इति वक्तव्यं· तथा च अतिप्रसंगः· सर्वस्यापि स्वासाधारणविक्रियावत्त्वाद्भोगकोटीनासाधारण
विक्रियात्वं तु प्रधानस्याप्यस्ति तत्कोटीनसुखादिविक्रियावत्त्वादिति दूषयति· अपीति· ननु भोगकोटीनासाधारण
विक्रियैव भोगः· न चाग्न्यादेस्तत्कोटीनियमेनाविक्रियास्ति· न च प्रधानस्यापि प्रसंगः इष्टापत्तेरिति शंकते· प्रधाने
ति· भोक्तृदृश्योरुभयोरपि भोक्तृत्वे शेषशेषीभावो न स्यादित्याह नेति· ननु भोगः सत्वगुणप्रधानचेतोरूपेण परि
णतप्रकृतेरेव धर्मस्तस्याः विक्रियोपपत्तेः न पुरुषस्य तस्याविक्रियत्वान्न चैवं तस्य भोगाभावे प्रसंगस्तस्य तथाविधचेतो
प्रतिबिंबितत्वमात्रेण भोक्तृत्वव्यपदेश इति शंकते· भोगधर्मवतीति· सत्वांगिनीति· सत्वगुणांगप्राधान्यं यस्याः तत
स्मिंश्चेतसीत्यर्थः· तर्हि चित्गतभोगेन चैतन्यैव विशेषो जायते वा न वेति विकल्प्य न द्वितीय इत्याह नेति· किं चास्मि
न्पक्षे स्वकीयं भास्वरूपं न च व्यर्थं स्यादित्याह· भोगरूपफलादिति· आद्येऽपि विशेषः सौम्यो वा असौम्यो वा इति
विकल्प्य सत्यविशेषवत्त्वे पुरुषस्य विकारित्वं स्यादिति मनसि निधायास्यारोपितविशेषवत्त्वमस्तीत्याद्यं शंकते·
अविद्येति· अनर्थेति· भोगरूपेत्यर्थः· तर्हि भोक्तृत्वविशेषवत्कर्तृत्वादिविशेषस्य प्रधानादेरारोपत्वमेवांगीकर्तुं
युक्तं नार्थवैशसं असमंजसमुररीकृत्य बंधमोक्षव्यवहारसिध्युपपत्तेस्तथा च न्यूनतायां प्रयोजनाभावात्प्रमाणाभावात्स्व
युक्तं सर्वश्रुतिविरोधापत्तेश्चेत्याह· परमार्थेति· पुरुषाद्भिन्नत्वं च प्रधानमित्यन्वयः· उक्तदोषजातं सांख्यस्यम

ब्र॰भा॰ना॰

तं मोक्षकामिना नादर्त्तव्यमिति ज्ञापनार्थमुक्तं। ननु द्वैतपक्षपातादित्याशङ्क्येनाह। इति नादर्त्तव्येति। आत्मैकत्वप्रयो
निरसनीयं बंधनात्वात्। शास्त्रप्रणयनानर्थक्यं शंकते। एकत्वेपीति। किमात्मैकत्वनिश्चयवंतं प्रति तस्यानर्थक्यमुच्य
ते तद्धूरीतं प्रति वेति विकल्प्य आद्यं प्रतिप्रणयनाभावादानर्थक्यदोषाभावमाह। नेत्यादिति। देशापादात्मवादि
त्यर्थः। संगृह्य वा कथंचिद्विवृणोति। आत्मैकत्व इति। निश्चित इति शेषः। तदभावे शास्त्रप्रणेतृत्वाभावे इयं कल्पने च
ब्र अर्थवदनर्थकं चेति विकल्पने वानुपपन्नेत्यर्थः। नैवानुपपन्नेति पाठे तु तदभाव इत्यनेन एकत्वनिश्चयाभा
वोऽभिधीयते तदानीं निरसनीयबंधादिसत्वादियकल्पनाबंधनिवृत्यर्थं शास्त्रप्रणयनकल्पना नानुपप सिद्
न्नेति योज्यं। किं चात्मैकत्वनिश्चये जाते तन्निश्चययुक्तेन कर्त्रा न शास्त्रार्थवत्तस्य स्वानुभवैर्व्याहते नेयं शंकाक
र्तुं मर्थिन शक्येत्याह। अभ्युपगत इति। प्रमाणार्थ इति। प्रमाणस्य शास्त्रस्यार्थः प्रयोजनमित्यर्थः। एकत्वनि
श्चयवंतं प्रति शास्त्रानर्थक्यशंकात्वनाभावश्चेत्याप्युक्त इत्याह। तदभ्युपगमे चेति। अत्राभ्युपगमो निश्चयः। ए
कत्वनिश्चयाभावदशायां तु निरसनीयाध्यारोपितबंधसत्वान्नानर्थकं तदपि श्रुत्यो... त्याह। शास्त्रप्रण
मनेति। अनेन द्वितीयः कल्पो निरस्तः। श्रुतिगतयत्रशब्दं व्याचष्टे। अन्यत्रेति। आथर्वणोपनिषदि द्वै श्री॰
विद्ये वेदितव्ये इत्युपक्रम्य अपरविद्यात्वेन वेदादिरूपा परा तु दृश्यत्वादिप्रत्यस्तमितसर्वद्वैतवस्तुविषयेत्युक्तेषां २८
विद्याविद्ययोर्विषयभेदः शास्त्रस्यादावेव संसूचित इत्याह। अत्र चेति। अद्वैतवादे सर्वाः शंका नावकाशं प्रामा
त्वे नैव निरासा शार्ङ्किको ऽस्मिन्शंकाश्रकस्यापि नात्र प्रवेश इत्युपसंहरति। अत इति। राजप्रमाणेति। प्रमा
णमाजेत्यर्थः। राजदंतादित्वात्परनिपातः। वेदांतप्रमाणमेव राजेव राजा तद्धा ह्रवः। नतूक्तन्यायात्ततोऽस्म आत्मैक

मा

दा.

॥ यथा न सतार्किकमते ईश्वरो धर्मेण प्रवेश्य इत्यन्वयः· पूर्वोक्तदोषं निराकरोति·
त्वमेवंविषय इव देशादिवदेशो रक्षणी यथा न स ··· शक्यः साधनमिति चेत्तत्कृतस्य नैकत्वस्य सर्वोदित्यर्थः· आत्मेति· आ
त्मनेति· उपाधिकृताः अनेकाः शक्यः साधनमिति चेत्तत्कृतस्य नैकत्वस्य ··· प्रयोजनाभावेनानुपपत्तिः संग्रहीतात्म न
त्मनो योऽनर्थः संसारस्तत्कृतत्वमित्यर्थः· आदिप्राप्तेः प्राप्तकामत्वेन प्रयोजनाभावेनानुपपत्तिः· अस्य कर्मफलदानार्थं चेत् आप्तकामस्याधिष्ठेयस्या
त्यनयास्वव्यतिरिक्तस्य जीवस्य सत्वात्तस्य संसारो नात्मनस्तदीय कर्मफलदानार्थं च आप्तकामस्याधिष्ठेयस्या
स्वप्नवत् सर्वमप्युपपद्यत इति सूत्रभाष्यादावेवप
दिष्टवन्तः संभवति सर्वव्यवहारस्याधिस्वप्नतुल्यत्वादित्यस्वप्नइवसर्वमप्युपपद्यतइतिसूत्रभाष्यादावेवप मुक्ता
रिहन्तइत्यर्थः· संस्थित्वेन स्वपक्षेपुरुषशब्दस्यईक्षणस्य चोपपत्तौ शेषमनुद्य निराकरोति· यस्मिन्निति· यजमानः
प्रस्तरइत्यादौ उपचारोदृष्टइत्याशंक्याह· नत्रगौणीति· प्रधानपक्षे ··· न केवलमीक्षणस्यानुपपत्तिः
वस्तुतस्यस्वरूपमपि न संभवतीत्याह· इहेति· मुक्तेति· मुक्तान् ··· र्दयित्वा बंधान्प्रत्येव प्रवृत्तिः कर्त्र
कर्माद्यपेक्षया बंधमोक्षादिप्रवृत्तिः भोगापवर्गार्थायाः स्थितायाः प्रवृत्तेर्नोपपद्यत इत्यर्थः· अनेन पुरुषार्थं प्रयो हि
जनमुररीकृत्य प्रधानं प्रवर्तत इति यदुक्तं शंकावसरे तन्निरस्तं· ईश्वरकारणवादे तु न कोऽपि दोष इत्याह· स्मृ
यथोक्तेति· एवं परपक्षं निराकृत्य प्रकृत श्रुतिव्याख्याने कुर्वन्सप्रावण मस्तज तेत्यस्य तात्पर्यार्थमाह· ईश्वरे
लोवेति· राहेवेत्यर्थः· अक्षरार्थप्रश्नपूर्वकमाह· कथमिति· हिरण्यगर्भस्य व्यमिति· हिरण्यगर्भ इत्याख्यायेनोपा
धिना आत्मनो न वनितं बुद्धमिभिः सर्वप्राणं समष्टिप्राणमित्यर्थः· यथाश्रुते कस्मिन्नहमुत्क्रांत इत्यादिना स्वजीव
आत्मन उत्क्रांत्याद्युपाधिसृष्टेः· यस्तु तत्वाद्धिरण्यगर्भे स्यात् तथात्वाद्युत्क्रमविरोधापत्तेः· हिरण्यगर्भस्यापि
स्युक्तिस्वात्मनोहिरण्यगर्भादिसंसारिभावोपिएतदुपाधिकइतिस्रष्टव्यमित्यर्थः· तस्य समष्टित्वमाह·
[illegible]

सर्वेति. अंतरात्मानमिति. सर्वस्थूलशरीरं तत्त्वादात्मबुद्धिगोचरत्वात् अंतरात्मा सत्यर्थः. ततइति. आनंतर्यो
र्थे पंचमी एवमुत्तरत्रापि नच भूतकार्यत्वात् प्राणस्य कथं ततः पूर्वकालीनत्वमिति वाच्यं सत्यं सृष्टस्य भूतसूक्ष्मनंत
रं प्राणमसृजतेति कल्पनीयत्वात्. नचैतदनंतरं भूतसृष्टौ किं विरोधः प्राक्तनस्यापंचीकृतस्थूलभूतविषयत्वो
पपत्तेः अतएव भोगसाधनाधिष्ठानानीत्युक्तं सूक्ष्माणां तथात्वायोगात् न चैवमपि स्थूलभूतसृष्ट्यनंतरमिं
द्रियमनःसृष्टौ किं विरोधः भूतारब्धदेहादि [illegible] श्रितानामेव तेषां कार्यक्षमत्वेन तेषां तत्त्वबोधीति भावः. भोगसा २
धनाधिष्ठान [illegible] भूतानां तत्कारणत्वादित्याह. कारणानीति. तेषां भूतानां लक्षणं तयाशब्दगु
णमित्यादिना अस्य धारणगुणा उक्ताः पूर्वपूर्वगुणानुवृत्तिस्तु पूर्वपूर्वस्योत्तरोत्तरोपादानत्वस्य चनार्थस्यो
ल्यतारतम्यसिद्ध्यर्थं च ऊह्येति बोध्यं. वायुमिति क्रमतो वायुरित्यादि प्रथमाः द्वितीयार्थाः प्राणमसृजतेति.
द्वितीययोपक्रमात्. तैरवेति. अपंचीकृतावस्थायामित्यर्थः. तस्य चेश्वरमिति. नियामकमित्यर्थः. संकीर्य
माणानामिति. अविशुद्धसत्त्वतया पापाचरणेन तैः पापैः संकीर्णमानानां संकरपरिहाराय चित्तशुद्धिसा
धनं तपोऽसृजतेत्यर्थः. फलमिति. लोकयते भुज्यत इति लोकः फलमित्यर्थः. नाम चेति. ब्राह्मणादिना श्री.
म्नां उपलक्ष्य व्यवहारसंकरार्थमित्यर्थः. नन्वीश्वरसृष्टस्य कथं कल्पनां सत्यत्वमंगीकर्तव्यमारोपरूपेणुक्तिर २५
जतादेरसृष्टत्वे व्यवहाराभावादित्याशंक्य [illegible] व्यवहारं मनेत्रमर्दनादिनाप्ययत्नेन सृष्टस्य द्विचंद्रम
शकमशकादेरारोपत्वदर्शनात्. अथ रज्ज्वन्तरस्य योगार्थः सृजत इति सूक्ष्मलोके नो [illegible] स्वप्नपदार्थस्य चे
[illegible]म त्वदर्शनान्नैवमित्याह. एवमेतादृति. अविद्याकाम कर्मादि दोषरूपं यद्वीजं तद्दपे [illegible] तत्साधनीकृते

त्यर्थः॥ तैमिरिकशब्दो नेत्रे अंगुल्यवष्टंभाद्युपलक्षणार्थः॥ एवमात्मप्रतिपत्त्यर्थमध्यारोपमुक्त्वापवाद ते
मवतारयति॥ पुनस्तस्मिन्नेवेति॥ ग्रामादिवदेव गंतव्यत्वभ्रमं वारयति॥ आत्मभाव इति॥ अस्तशब्देनना
शो नाभिधीयते भेदकोपाधि नामरूपयोर्नाशो पि स्वरूपस्य समुद्रात्मना विद्यमानत्वादित्याह॥ स्वात्मरूपतिरस्कार
मिति॥ पूर्वरूपतिरस्कारमित्यर्थः॥ तद्वदिति॥ नामरूपनाशानंतरं परिशिष्टं उदकलक्षणं वस्तु समुद्र इत्येवो
च्यते॥ इत्यन्वयः॥ पुरुषस्येति॥ कर्मणि षष्ठी॥ पुरुषं स्वात्मरूपं पश्यतः सर्वं स्वरूपत्वेन पश्यत इत्यर्थः॥ द्रष्टुरि
के आगंतुकस्य दर्शनस्य कर्तृ प्रतीयत इत्यत आह॥ दर्शनस्य स्वरूपभूतस्येति॥ स्वरूपत्वे दर्शनस्य तत्र कर्तृत्वानु
पपत्तेस्तदर्थं कर्तृत्वं च प्रत्ययविरोध इत्याशंक्याह॥ सर्वतः स्वप्रकाशक इत्यत्र यथार्के इत्यर्थकस्य प्रत्ययस्योपचरित
त्वं तद्वदित्याह॥ यथार्क इति॥ नदीनामिवेति॥ इवशब्दस्तथाशब्दार्थे यथा नदीनां समुद्रे यथा तथा पुरुषे
यन्नेमित्यन्वयः॥ अस्तगमनस्वरूपमाह॥ भिद्येते इति॥ नामरूपभेद एव अस्तगमनमित्यर्थः॥ यथास्वमिति॥
यस्य यस्य स्वरूपं प्राणाद्यात्मकं तद्धि भिद्येत इत्यन्वयः॥ पुरुष इत्येवं प्रोच्यत इत्यस्यार्थमाह॥ भेदे चेति॥ यदन्नाम ति
ति॥ कलानां [illegible] रूपस्यारोप्याधिष्ठानोभयात्मकं सत्यानृतमिथुनरूपं तत्रारोप्यस्य नामरूपात्मकस्य भेदे अ
धिष्ठानात्मकं रूपं पुरुषात्मना उच्यत इत्यर्थः॥ यथा समुद्रस्वरूपभूतं जलं फेनधारा दृष्ट्या भिन्नं गंगादिनाम
रूपोपाधिना समुद्राद्भिन्नमिव व्यवह्रियमाणं तदुपाधिविगमे समुद्रस्वरूपमेव प्रतिपद्यते॥ एवमविद्याकृतनाम
रूपोपाधिवशादात्मनो भिन्नमिवावस्थितं सर्वं जगदिदं यया अविद्याकृतनामरूपविगमे ब्रह्ममात्रतयावधा
ष्यत इत्यर्थः॥ एवं प्राणादिकेनोपाधिकृतात्मनः क्रमेणादिशब्दितमरणादिव्यवहार इत्युक्तेः प्रयोजनं प्राप

द्विनिवृत्तो उत्क्रमणादि सर्वसंसारधर्मरहितात्मरूपावस्थानरूपं दर्शयितुं सह षडुक्तिवाक्यं व्याचष्टे॰ यद
वैविद्यास्मिन्नित्यादिना॰ परिवाराद्वृत्ति॰ नाम्नोः परित्तः॰ नामेनेमध्याञ्चव्यो नास्तार्थ क्रोकप्रविशेषाद्वित्यर्थः॰ यथाप्रवेशि
तावृत्तिः॰ यथावत्सम्यक्त्ववैशिष्ट्यादित्यर्थः॰ मानोर्धव्यतिरेकप्रदर्शनेनस्पष्टयति॰ न वेदीति॰ प्रियव्याख्याणं कृता
र्थता बुद्धिजननार्थत्वानित्यादिवाक्यं व्याचष्टे॰ तानेवमिति॰ प्रकरणेनेति॰ प्रक्षेपेणेत्यर्थः॰ पितृत्वं तव इति
जनकश्चोपनेता च यस्त्रविद्यां प्रयच्छति॰ अन्नदाता भयत्राता पञ्चैते पितरः स्मृता इति स्मृतेरित्यर्थः॰ योस्माकं
कमि॰ हेतुमाह॰ त्वमेव वदन्विद्यत्तोति मा त्रेणविद्यानिश्चित्यार्थो किं वै तेभ्यस्यापेक्षाया स्वशरीरमेव परिचार ८
कतया दासस्यभावेन गुरवे दत्तमित्याह॰ तस्मादिति॰ पितृत्वाद्वा किं पूज्यतरत्वं परिचार्यत्वं स्वामित्वं वि
७ मुवस्तुव्यमित्यर्थः॰ अत एव वासिनेयकेषां चाधिसहदोस्यायेत्युक्तमिति भाव॥ ॥६॥ ॥इति श्री
मत्परमहंसपरिव्राजकाचार्य श्रीमत्कैवल्येन्द्रशिष्य ज्ञानेन्द्रगुरुचरणसेविनारायणेन्द्रसरस्वतीविरचि
त प्रश्नोपनिषद्भाष्यविवरणं समाप्तम्॥ ॥श्री॥ ॥ ॥श्री॥ ॥श्री॥ सोमेश्वरो विजयते जगदेकनाथः॥ ॥